उवाच कौरवं [राजन्] वचनं स वृषस्तदा ।
'अस्य राज्यप्रदानस्य सदृशं किं ददानि ते' ॥

At that time, Karna told Duryodhana: "What shall I give you to equal this gift of a kingdom?"

अत्यन्तं सख्यमिच्छामीत्याह तं स सुयोधनः ।
हर्षाच्चोभौ समाश्लिष्य परां मुदमवापतुः ॥

"Friendship unto the very end, I would have," said Duryodhana to him. Clasping each other in glee, the two went into raptures.

ततस्स्रस्तोत्तरपटस्सप्रस्वेदस्सवेपथुः ।
विवेशाधिरथो रङ्गं यष्टिप्राणो ह्वयन्निव ॥

Then, with the upper garment slipped, with profuse perspiration and tremor, Adhiratha (Karna's foster-father) entered the arena, supporting himself on a staff and as if calling (his son).

तमालोक्य धनुस्त्यक्त्वा पितृगौरवयन्त्रितः ।
कर्णोऽभिषेकार्द्रशिराश्शिरसा समवन्दत ॥

On seeing him, Karna, bound by his respect for his father, threw the bow and, with his head wet with the coronation-water, bowed.

तं दृष्ट्वा सूतपुत्रोऽयमिति सञ्चिन्त्य पाण्डवः ।
भीमसेनस्तदा वाक्यमब्रवीत्प्रहसन्निव ॥

On seeing him, (Adhiratha), Bhima, son of Pandu, thought that Karna was the son of a charioteer and at that time spoke, as if laughing (at him):

'न त्वमर्हसि पार्थेन सूतपुत्र रणे वधम् ।
कुलस्य सदृशस्तूर्णं प्रतोदो गृह्यतां त्वया ॥
अङ्गराज्यं च नार्हस्त्वमुपभोक्तुं नराधम ॥'

"You son of a charioteer, you are not fit to be killed by Arjuna in a fight; quick, take up the whip that is proper to your family. Nor are you fit, you low man, to enjoy the kingdom of the Angas."

ततो दुर्योधनः कोपादुत्पपात महाबलः ।
सोऽब्रवीद्भीमकर्माणं भीमसेनमवस्थितम् ॥

The mighty Duryodhana then jumped up in ire and spoke to that Bhima of terrible deeds standing there:

'वृकोदर न युक्तं ते वचनं वक्तुमीदृशम्।
शूराणां च नदीनां च प्रभवो दुर्विभावनः।
भवतां च यथा जन्म तदप्यागमितं मया॥

"Bhima, it is not meet that you should talk such words. It is improper to enquire into the origin of warriors and rivers. And the manner of your birth has also been learnt by me.

'सकुण्डलं सकवचं सर्वलक्षणलक्षितम्।
कथमादित्यसदृशं मृगी व्याघ्रं जनिष्यति॥

"How can a doe give birth to this tiger, this Karna (born) with ear-rings and armour, marked with every mark of beauty and equal to the sun?

'पृथिवीराज्यमर्होऽयं नाङ्गराज्यं नरेश्वरः।
यस्य वा मनुजस्येदं न क्षान्तं मद्विचेष्टितम्।
रथमारुह्य पद्भ्यां स विनामयतु कार्मुकम्'॥

"This ruler of men merits the kingdom of the whole world, not the kingdom of the Angas only. And to whomsoever this act of mine is not bearable, let him mount

the chariot and, with his feet, bend his bow."

ततस्सर्वस्य रङ्गस्य हाहाकारो महानभूत्।
साधुवादानुसंवद्धः सूर्यश्चास्तमुपागमत् ॥

Then, loud cries of "Hah, Hah" arose from the whole amphitheatre. And, close upon the applause, the sun also set.

ततो दुर्योधनः कर्णमालम्ब्याग्रकरे नृपः।
दीपिकाभिः कृतालोकस्तस्माद्रङ्गाद्विनिर्ययौ ॥

Taking Karna by the hand and (with his way) lighted up by lamps, king Duryodhana then went out of the stadium.

पाण्डवाश्च सहद्रोणास्सकृपाश्च [विशांपते]।
भीष्मेण सहितास्सर्वे ययुस्स्वं स्वं निवेशनम् ॥

The Pandavas also, together with Drona, Kripa and Bhishma, all went, each to his own abode.

अर्जुनेति जनः कश्चित् कश्चित्कर्णेति [भारत]।
कश्चिद्दुर्योधनेत्येवं ब्रुवन्तः प्रस्थितास्तदा ॥

'Arjuna' says one; 'Karna' says another; 'Duryodhana' says a third; so saying, the people then departed.

दुर्योधनस्यापि तदा कर्णमास्थाय [पार्थिव] ।
भयमर्जुनसंप्राप्तं क्षिप्रमन्तरधीयत ॥

And obtaining then the support of Karna, Duryodhana soon lost his fear of Arjuna.

धृतराष्ट्रस्तु [राजेन्द्र] यदा कौरवनन्दनम् ।
युधिष्ठिरं विजानन्वै समर्थं राज्यरक्षणे ।
यौवराज्याभिषेकार्थममन्त्रयत मन्त्रिभिः ।
ते तु बुध्वाऽन्वतप्यन्त धृतराष्ट्रात्मजास्तदा ॥

When, finding that Yudhisthira, the son of Pandu (of the Kuru line), was capable of protecting the State, Dhritarashtra took counsel with his ministers for his installation as heir-apparent, the sons of Dhritarashtra, coming to know of this, burnt (with envy).

ततस्संवत्सरस्यान्ते यौवराज्याय [पार्थिव] ।
स्थापितो धृतराष्ट्रेण पाण्डुपुत्रो युधिष्ठिरः ॥

Then at the end of a year, Yudhisthira, the son of Pandu, was established as heir-apparent by Dhritarashtra.

ततोऽदीर्घेण कालेन कुन्तीपुत्रो युधिष्ठिरः ।
पितुरन्तर्दधे कीर्तिं शीलवृत्तसमाधिभिः ॥

Within a short time then, Yudhisthira, son of Kunti, obscured his father's fame by his own character, behaviour and devotion to duty.

द्रोणो जगाद वचनं समालिङ्ग्य तु फाल्गुनम् ॥

Embracing Arjuna, Drona said the words:

'देवा युधि न शक्तास्त्वां योद्धुं दैत्या न दानवाः ।
नाहं त्वत्तो विशिष्टोऽस्मि किं पुनर्मानवा रणे ॥

"The gods cannot fight you in battle, nor can the demons. I (myself) am not your superior in battle; why (speak of) ordinary men?

'एकस्त्वाधिको लोके यो हि वृष्णिकुलोद्भवः ।
कृष्णः कमलपत्राक्षः कंसकालियसूदनः ॥

"There is one who is your superior in this world, he who is born in the Vrishni race, Krishna of lotus eyes, the destroyer of Kamsa and of (the serpent) Kaliya.

'अपि चार्थे तव पुरा शक्रेण किल चोदितः ॥

"Long ago, He was urged by Indra on your behalf.

(कृष्णः—)

"जानामि पाण्डवे वंशे जातं शस्त्रभृतां वरम् ।
आवयोस्सख्यसदृशं न च लोके भविष्यति ॥

(Krishna—)

'I know that greatest of men who carry arms who has been born in the family of Pandu. Equal to the friendship between us two, there shall be none in the world.

"यस्तद्भक्तस्स मे भक्तो यस्तं द्वेष्टि स मामपि ।
यन्मे वित्तं तु तत्तस्य तं विनाऽहं न जीवये ॥"

'He who is his friend is also mine; he who hates him hates me also. The riches I have are his; (verily), without him I cannot live.'

'इति पार्थ पुरा शक्रमाह सर्वेश्वरो हरिः ।
तस्मात्तवापि सदृशस्तं विनाऽभ्यधिकः पुमान् ।
न चेह भविता लोके तमेव शरणं व्रज' ॥

"So, Arjuna, did Hari (Krishna), the lord of all, tell Indra once (concerning you). Therefore, equal to you or superior to you, there will be none in the world except Him; seek Him for (thy) protection."

तथेति च प्रतिज्ञाय द्रोणाय कुरुपुङ्गवः ।
उपसङ्गृह्य चरणौ युधिष्ठिरवशोऽभवत् ॥

Promising Drona that he would do so, the best of the Kuru house, Arjuna, prostrated at Drona's feet and placed himself under the control of Yudhisthira.

न शशाक वशे कर्तुं यं पाण्डुरपि वीर्यवान् ।
सोऽर्जुनेन वशं नीतो राजाऽऽसीद्यवनाधिपः ॥

Arjuna subdued the king of the Yavanas, whom even the valorous Pandu could not bring under conrol.

सुमित्रं नाम सौवीरमर्जुनोऽदमयच्छरैः ॥

With his arrows, Arjuna subdued the Sauvira king named Sumitra.

भीमसेनसहायश्च रथानामयुतं च सः ।
अर्जुनस्समरे प्राच्यान् सर्वानेकरथोऽजयत् ॥

With a single chariot and with Bhima as his aid, Arjuna conquered in battle all the kings of the East with (their) myriad chariots.

तथैवैकरथो गत्वा दक्षिणामजयद्दिशम् ।
धनौघं प्रापयामास कुरुराष्ट्रं धनञ्जयः ॥

Proceeding similarly with a single chariot, he conquered the South. Arjuna, the winner of wealth, brought a heap of treasure to the Kuru empire.

यतः पञ्चदशे वर्षे सर्वमेतच्चकार सः ।
तं दृष्ट्वा धार्तराष्ट्राणां ततो भयमजायत ॥

Since all this Arjuna did in his fifteenth year, fear arose in the sons of Dhritarashtra on seeing him.

एवं सर्वे महात्मानः पाण्डवा मनुजोत्तमाः ।
परराष्ट्राणि निर्जित्य स्वराष्ट्रं वव्रृधुः पुरा ॥

Thus did the Pandavas, all of them great souls and best of men, conquer the enemy kingdoms of yore and expand their own kingdom,

ततो बलमतिख्यातं विज्ञाय दृढधन्विनाम् ।
दूषितस्सहसा भावो धृतराष्ट्रस्य पाण्डुषु ।
स चिन्तापरमो राजा न निद्रामलभन्निशि ॥

Learning then that the power of the firm archers, the Pandavas, had become very celebrated, Dhritarashtra's feeling towards the Pandavas suddenly turned evil. All anxiety, the king could not sleep at night.

गुणैस्समुदितान् दृष्ट्वा पौराः पाण्डुसुतांस्तदा ।
कथयन्ति स्म सम्भूय चत्वरेषु सभासु च ॥

At that time, seeing the sons of Pandu endowed with all good qualities, the citizens, gathering at the cross-roads and assembly-halls, began to speak:

'प्रज्ञाचक्षुरचक्षुष्ट्वात् स कथं नृपतिर्भवेत् ।
तथा शान्तनवो भीष्मस्सत्यसन्धो महाव्रतः ।
प्रत्याख्याय पुरा राज्यं न स जातु ग्रहीष्यति ॥

"'Having no eye, how can Dhritarashtra be the king? And Bhishma, son of Santanu, one who is true to his promise and who rigidly observes his vow, having once renounced the kingdom, will never take it.

'ते वयं पाण्डवज्येष्ठं तरुणं वृद्धशीलिनम् ।
अभिषिञ्चाम साध्वद्य सत्यकारुण्यवेदिनम् ॥'

"We shall therefore fittingly crown now the eldest of the Pandavas who is youthful but experienced, truthful and compassionate."

तेषां दुर्योधनश्श्रुत्वा तानि वाक्यानि जल्पताम्।
ततो विरहितं दृष्ट्वा पितरं प्रतिपूज्य सः ।
पौरानुरागसन्तप्तः पश्चादिदमभाषत ॥

Hearing the citizens speak those words, Duryodhana met his father when he was alone, paid his respects and, tormented by the citizens' love (for Yudhisthira), spoke this:

'श्रुता मे जल्पतां तात पौराणामशिवा गिरः ।
त्वामनादृत्य भीष्मं च पतिमिच्छन्ति पाण्डवम् ॥

"Father, unhappy words of citizens talking have been heard by me. Slighting you and Bhishma, they wish to have Yudhisthira as ruler.

'मतमेतच्च भीष्मस्य न स राज्यं बुभुक्षति ।
अस्माकं तु परां पीडां चिकीर्षन्ति पुरे जनाः ॥

"And this is agreeable to Bhishma, for he does not want to enjoy the kingdom. It is to us that the people in the city want to do great harm.

'पितृतः प्राप्तवान् राज्यं पाण्डुरात्मगुणैः पुरा ।
स एष पाण्डोर्दायाद्यं यदि प्राप्नोति पाण्डवः ।
अवज्ञाता भविष्यामः, परपिण्डोपजीविनः ।
न भवेम यथा राजंस्तथा नीतिर्विधीयताम् ॥

"In the past, Pandu, by his qualities, inherited the kingdom from his father and if this Yudhisthira, son of Pandu, obtains the inheritance of Pandu, we shall become despised (creatures). Let such a policy be adopted, O king, that we shall not have to live at the mercy of others.

'यदि त्वं हि पुरा राजन्निदं राज्यमवाप्तवान् ।
ध्रुवं प्राप्स्याम च वयं राज्यमप्यवशे जने ॥'

"King, if you had secured this kingdom previously, we should get the kingdom for certain, even if the people are not under our control."

धृतराष्ट्रस्तु सञ्चिन्त्य दुर्योधनमथाब्रवीत् ॥

Dhritarashtra reflected and then told Duryodhana:

'धर्मनित्यस्तथा पाण्डुस्सुप्रीतो मयि कौरवः ।
तस्य पुत्रो यथा पाण्डुस्तथा धर्मपरस्सदा ॥

"That ever-righteous Pandu was so loving towards me and his son, Yudhisthira is, like Pandu, always righteous.

'गुणवान् लोकविख्यातो नगरे च प्रतिष्ठितः ।
स कथं शक्यतेऽस्माभिरपाकर्तुं नरर्षभः ॥'

"Gifted, famed in the world and established in the capital, how can that excellent man, Yudhisthira, be removed from his place by us?"

दुर्योधनः—

'पाण्डवेभ्यो भयं नस्स्यात् तान्विवासयतां भवान्।
निपुणेनाभ्युपायेन नगरं वारणावतम् ॥

Duryodhana—

"There will be danger for us from the Pandavas. Banish them to the city of Varanavata by some clever device.

'यदा प्रतिष्ठितं राज्यं मयि राजन् भविष्यति ।
तदा कुन्ती सहापत्या पुनरेष्यति भारत ॥'

"O Bharata king! when the kingdom becomes established as mine, Kunti shall then return with her sons."

ततो दुर्योधनो राजा सर्वास्तु प्रकृतीश्शनैः ।
अर्थमानप्रदानाभ्यां सञ्जहार सहानुजः ॥

Then, king Duryodhana, along with his brothers, slowly won over all the subjects by bestowing on them wealth and honour.

धृतराष्ट्रप्रयुक्तास्तु केचित्कुशलमन्त्रिणः ।
कथयाञ्चक्रिरे रम्यं नगरं वारणावतम् ॥

Certain expert ministers, set up by Dhritarashtra, described the city of Varanavata as beautiful.

कथ्यमाने तथा रम्ये नगरे वारणावते ।
गमने पाण्डुपुत्राणां जज्ञे तत्र मतिः [नृप] ॥

When the city of Varanavata was described as beautiful in that manner, the idea of going there occurred to the sons of Pandu.

यदा त्वमन्यत नृपो जातकौतूहला इति ।
उवाचैतानेत्य तदा पाण्डवानम्बिकासुतः ॥

When king Dhritarashtra, son of Ambika, understood that the Pandavas had become enthusiastic (about Varanavata), he came to them and told them then :

'ते ताता यदि मन्यध्वमुत्सवं वारणावते ।
कञ्चित्कालं विहृत्यैवं सुखिनः पुनरेष्यथ ॥'

"Boys, if you have a mind for the festival (of Siva) in Varanavata, enjoy yourselves there for sometime and return happily."

धृतराष्ट्रस्य तं काममनुबुध्य युधिष्ठिरः ।
आत्मनश्चासहायत्वं तथेति प्रत्युवाच तम् ॥

Perceiving the wish of Dhritarashtra and, his own helplessness, Yudhisthira replied to him: "Even so be it."

दुर्योधनः परं हर्षमगच्छत्स दुरात्मवान् ।
स पुरोचनमानीय सचिवं वाक्यमब्रवीत् ॥

Duryodhana, that wicked soul, exulted greatly. He brought his minister Purochana and said:

'पाण्डवा धृतराष्ट्रेण प्रेषिता वारणावतम् ।
तत्र गत्वा चतुश्शालं गृहं परमसंवृतम् ।
नगरोपान्तमाश्रित्य कारयेथा महाधनम् ॥

"The Pandavas have been sent by Dhritarashtra to Varanavata. You shall go there and construct in the outskirts of the city a costly residence, with four apartments (facing each other in pairs) and fully enclosed (by high walls).

'शणं तैलं घृतं चैव जतु दारूणि चैव हि ।
तस्मिन्वेश्मनि सर्वाणि निक्षिपेथास्समन्ततः ॥

"Hemp, oil, ghee, lac, wood—all these you shall place everywhere in that house.

'वेश्मन्येवं कृते तत्र कृत्वा तान् परमार्चितान् ।
वासयेथाः पाण्डवेयान् यथा तुष्येच्च मे पिता ॥

"When the house has been thus built, you shall give the Pandavas the best reception and make them live in it in such a manner that my father may be pleased.

'ज्ञात्वा च तान् सुविश्वस्तान् शयानानकुतोभयान् ।
अग्निस्त्वया ततो देयो द्वारतस्तस्य वेश्मनः ॥'

"Making sure that they are quite unsuspecting, and asleep, and without fear from any quarter, you must then set fire to the house at the entrance."

स तथेति प्रतिज्ञाय सर्वं चक्रे पुरोचनः ।
पाण्डवास्तु कुरून्वृद्धान् अभिवाद्य यतव्रताः ।
सर्वा मातॄस्तथाऽऽपृच्छ्य प्रययुर्वारणावतम् ॥

Promising to do so, Purochana did everything. And the Pandavas, acting up to their promises, saluted the Kuru-elders, took leave of all their mothers, and went to Varanavata.

विदुरः पाण्डवश्रेष्ठमिदं वचनमब्रवीत् ।
'कक्षघ्नः शिशिरघ्नश्च महाकक्षे बिलौकसः ।
न दहेदिति चात्मानं यो रक्षति स जीवति ॥'
अनुशिक्ष्यानुगम्यैतान् विदुरः प्रययौ गृहान् ॥

Vidura spoke these words to Yudhisthira, the best of the Pandavas: "He survives who protects himself knowing that fire which burns wood and destroys frost

in the interior of a big forest cannot burn the creatures living in holes." Having advised (them) thus and accompanied them (to some distance), Vidura went (back) to his dwelling.

सत्कृताश्चैव पौरैस्ते पौरान्सत्कृत्य च [अनघ]।
अलङ्कृतं जनाकीर्णं विविशुर्वारणावतम् ॥

Welcomed by the citizens with honour and honouring the citizens (in turn), the Pandavas entered the decorated Varanavata, crowded with people.

तेभ्यो भक्ष्याणि पानानि शयनानि शुभानि च ।
आसनानि च मुख्यानि प्रददौ स पुरोचनः ।
निवेदयामास गृहं शिवाख्यमशिवं तदा ॥

That Purochana gave them food, drinks, beautiful beds and excellent seats, and offered (them) an inauspicious house named (however) Siva (the auspicious one).

विदुरस्य सुहृत्कश्चित् खनकः कुशलः क्वचित् ।
चक्रे च वेश्मनस्तस्य मध्ये नातिमहद्बिलम् ॥

A friend of Vidura, an expert digger, dug somewhere in the middle of that house a fairly big subway.

तत्र ते सायुधास्सर्वे वसन्ति स्म क्षपां [नृप] ।
विश्वस्तवदविश्वस्ता वञ्चयन्तः पुरोचनम् ॥

Apparently unsuspecting but (really) suspecting, and deceiving Purochana, all the Pandavas, equipped with arms, lived in that house for the night.

अथ प्रवाते तुमुले निशि सुप्ते जने तदा ।
तदुपादीपयद्भीमः शेते यत्र पुरोचनः ॥

Then, in the night, when a great gale arose and people were asleep, Bhima set fire to the house in the place where Purochana was lying.

ज्ञात्वा तु तद्गृहं सर्वमादीप्तं पाण्डुनन्दनाः ।
बिलेन तेन निर्गत्य जग्मुर्मात्रा परन्तपाः ॥

Making sure that the whole house had caught fire on all sides, the Pandavas, the destroyers of their enemies, escaped by the subway and, with their mother, went away.

ततः प्रवासितो विद्वान् विदुरेण नरस्तदा ।
पार्थानां दर्शयामास नावं विस्रम्भिभिः कृताम् ।
तारयित्वा ततो गङ्गां यथागतमगाद्धि सः ॥

At that time then, a man of knowledge, who had been sent out by Vidura to live abroad, showed to the Pandavas a boat constructed by trustworthy men and having made them cross the Ganges, he went away as he came.

गङ्गामुत्तीर्य वेगेन भीमसेनो महाबलः ।
आदाय कुन्तीं भ्रातृंश्च जगामाशु स पावनिः ॥

Having crossed the Ganges quickly, the mighty Bhimasena, son of Vayu, walked fast, carrying Kunti and his brothers.

अथाम्बिकेयस्सामात्यः सकर्णस्सहसौबलः ।
सात्मजः पार्थनाशस्य सत्यत्वं जहर्ष च ॥

Thinking that the death of the Pandavas had really taken place, Dhritarashtra, along with his ministers, Karna, Sakuni and his own sons, rejoiced.

भीष्मश्च [राजन्] दुर्धर्षो विदुरश्च महामतिः ।
जहृषाते सत्यन्दौ तौ जातुषाग्नेर्विमोचनम् ॥

The unassailable Bhishma and the wise Vidura rejoiced, knowing of the escape (of the Pandavas) from the conflagration of the lac house.

द्रोणादयश्च धर्मैस्तु तेषां तान्मोचितान्विदुः।
अन्ये जना वदन्ति स्म दग्धा जीवन्ति वा न वा॥

And Drona and others knew that the Pandavas must have been rescued by their Dharma. Others, the common folk, said in doubt: "They might have been burnt (to death) or they may be alive."

ततो भीमो वनं घोरं प्रविश्य विजनं महत्।
तत्र निक्षिप्य तान्सर्वान् जजागार स्वयं तदा॥

Entering then a big, desolate and dreadful forest, Bhima placed down all of them (his brothers and mother) (to sleep) there and himself kept awake.

तत्र तेषु शयानेषु हिडिम्बो नाम राक्षसः।
अभ्यद्रवत संक्रुद्धो भीमसेनमरिन्दमम्।
निगृह्य तं बलाद्भीमः पशुमारममारयत्॥

When they were lying there, a demon named Hidimba ran at Bhima, the subduer of enemies, in great anger; seizing him by force, Bhima killed him as he would an animal.

हिडिम्बा भगिनी तस्य भीमसेनमभाषत ।
'अहं शुश्रूषुरिच्छेयं तव गात्रं निषेवितुम्' ॥

The demon's sister, Hidimba, spoke to Bhima: "Desirous of attending upon you, I wish to serve your body."

प्रजज्ञे राक्षसी पुत्रं भीमसेनान्महाबलात् ।
सद्यो हि गर्भं राक्षस्यो लभन्ते प्रसवन्ति च ॥

The demoness gave birth to a son through the mighty Bhima. Immediately do demonesses conceive and bring forth the child.

कृत्यकाल उपस्थास्ये पितॄनिति घटोत्कचः ।
आमन्त्र्य रक्षसां श्रेष्ठः प्रतस्थे चोत्तरां दिशम् ॥

"I shall wait on you when there is anything to be done": thus taking leave of his father and uncles (Bhima and

his brothers), Ghatotkacha (the son of Bhima and Hidimba), the foremost among the Rakshasas, set out towards the north.

'यदा मां संस्मरेर्भूय आगन्तास्म्याशु भारत'।
इति सा भावमासज्य स्वां गतिं प्रत्यपद्यत ॥

"Scion of Bharata, (Bhima), I will come to you forthwith when you think of me again." Fixing her love (on Bhima) thus, that Hidimba (also) went her way.

ततस्ते पाण्डवास्सर्वे बिभ्रतस्तापसं वपुः ।
एकचक्रां गता ऊषुर्ब्राह्मणस्य निवेशने ॥

Then, all the Pandavas, putting on an ascetic appearance, went to Ekachakra and lived in a Brahmin's house.

भैक्षं चरन्तस्तु तदा जटिला ब्रह्मचारिणः ।
बभूवुर्नागराणां च गुणैस्संप्रियदर्शनाः ॥

Going about collecting alms, with matted hair and as Brahmacharins, they, by their qualities, became very dear to the citizens.

समीपे नगरस्यास्य बको वसति राक्षसः ।
तेनोपसृष्टा नगरी त्रातारं नाधिगच्छति ॥

In the vicinity of that city (Ekachakra), there lived the demon Baka. Infested by him, the city could not get a saviour.

आसाद्य तु वनं तस्य बकं भीमो बभञ्ज ह ।
ततः प्रभृति रक्षांसि तत्र सौम्यानि [भारत] ॥

Bhima went to the forest of Baka and killed him. From that time, demons were well-behaved in Ekachakra.

वसत्सु तेषु प्रच्छन्नं व्यासस्तान्मुनिरब्रवीत् ॥

When they were (thus) living incognito, sage Vyasa told them:

'आसीत्तपोवने काचिदृषेः कन्या महात्मनः ।
नाध्यगच्छत्पतिं सा तु कन्या रूपवती सती ॥

"In a certain penance-grove, there was the daughter of a high-souled sage; beautiful and virtuous, that maiden did not obtain a husband.

'तोषयामास तपसा सा किलोग्रेण शङ्करम् ।
तामथ प्रत्युवाचेदमीशानो वदतां वरः ।
"पञ्च ते पतयो भद्रे भविष्यन्तीति भारताः" ॥

"She pleased God Siva with severe penance and then the most eloquent Siva told her this: 'Auspicious lady! five scions of the Bharata line will become your husbands.'

'द्रुपदस्य कुले जज्ञे सा कन्या देवरूपिणी ।
निर्दिष्टा भवतां पत्नी कृष्णा पार्षत्यनिन्दिता ।
सुखिनस्तामनुप्राप्य भविष्यथ न संशयः ॥'

"That maiden has been born with divine beauty in the family of Drupada. That flawless daughter of Parshata (Drupada), Krishna (Draupadi), has been ordained as your wife. Obtaining her, you shall doubtless become happy."

प्रययुर्द्रौपदीं द्रष्टुं पाञ्चालान्पाण्डुनन्दनाः ।
कुम्भकारस्य शालायां निवासं चक्रिरे तदा ॥

The sons of Pandu went to the Panchala country to see Draupadi (Krishna) and lived in the yard of a potter.

तान्संप्राप्तांस्तथा वीरान् जज्ञिरे न नराः क्वचित्॥

The people nowhere knew those warriors, come (there) in that manner.

यज्ञसेनस्य कामस्तु पाण्डवाय किरीटिने।
दास्यामि कृष्णामिति वै न चैनं विवृणोति सः॥

And Yajnasena's (Drupada's) desire was that he should give Draupadi to Arjuna, the son of Pandu; but he did not disclose this desire.

दृढं धनुरथानम्यं कारयामास [भारत]।
यन्त्रं वैहायसं चापि [राजन्] लक्ष्यं च काञ्चनम्॥

He then caused to be made a firm unbendable bow, a machine moving in the air and a target in gold.

"'इदं सज्यं धनुः कृत्वा सज्जैरेभिश्च सायकैः।
अतीत्य लक्ष्यं यो वेद्धा स लब्धा मत्सुतामिति॥'
इति स द्रुपदो राजा स्वयंवरमघोषयत्॥

"Whosoever strings this bow and with these arrows set (thereon) pierces, through the machine, the target, he shall obtain my daughter"—thus did king Drupada announce the Svayamvara.

तच्छ्रुत्वा पार्थिवास्सर्वे समीयुस्तत्र [भारत] ।
दुर्योधनपुरोगाश्च सकर्णाः कुरवो [नृप] ।
ब्राह्मणाश्च महाभागा देशेभ्यस्समुपागमन् ॥

Hearing that, all the kings assembled there, including the Kurus headed by Duryodhana and accompanied by Karna. And illustrious Brahmins also came from many countries.

ब्राह्मणैरेव सहिताः पाण्डवास्समुपाविशन् ॥

The Pandavas sat along with the Brahmins themselves.

मञ्चेषु च परार्ध्येषु पौरजानपदा जनाः ।
कृष्णादर्शनसिद्ध्यर्थं सर्वतस्समुपाविशन् ॥

And the citizens and country-folk sat all around in the excellent galleries for securing a sight of Draupadi.

माल्यां च समुपादाय काञ्चनीं समलंकृताम् ।
अवतीर्णा ततो रङ्गं द्रौपदी [भरतर्षभ] ॥

Holding a golden ornamented garland, Draupadi then came into the amphitheatre.

तेऽलङ्कृताः कुण्डलिनो युवानः
परस्परं स्पर्धया प्रेक्षमाणाः ।
कृष्णा ममैवेत्यभिभाषमाणा
नृपास्समुत्पेतुरथासनेभ्यः ॥

Those youthful kings with ear-rings and (other) ornaments, looking at each other in rivalry, and saying "Draupadi is for me only", jumped up from their seats.

ततस्तु ते राजगणाः क्रमेण
कृष्णानिमित्तं कृतविक्रमाश्च ।
तत्कार्मुकं संहननोपपन्नं
सज्यं न शेकुर्मनसाऽपि कर्तुम् ॥

Then those assembled kings showed their valour one after another for obtaining Draupadi; that firm bow, they could not string even with their minds.

यदा निवृत्ता राजानो धनुषस्सज्यकर्मणः ।
कृष्णं च मनसा कृत्वा जगृहे चार्जुनो धनुः ॥

When the kings had turned back from the act of stringing the bow, Arjuna, keeping Krishna in his mind, took the bow.

सज्यं च चक्रे निमिषान्तरेण
विव्याध लक्ष्यं निपपात तच्च ॥

He strung it in a minute and pierced the target; and it fell.

विनाऽपि हासं हसतीव कृष्णा
पार्थस्य वक्षस्यविशङ्कमाना ।
क्षिप्त्वा स्रजं पार्थिववीरमध्ये
वराय वव्रे मदनं रतीव ॥

Draupadi, appearing to smile even without smiling, unhesitatingly threw the garland on Arjuna's chest and in the midst of royal warriors, chose him as husband, as Rati (chose) Madana.

द्वैपायनवचः कृत्स्नं सस्मार मनुजर्षभः ।
अब्रवीत्सहितान्भ्रातॄन् मिथोभेदभयान्नृपः ।
'सर्वेषां द्रौपदी भार्या भविष्यति हि नश्शुभा'॥

(Yudhisthira), the best among men, thought of the whole of Vyasa's words. The king (Yudhisthira), afraid of mutual quarrel, told his brothers assembled together: "Beautiful Draupadi shall become the wife of us all."

तत आहूय पाञ्चाल्यो राजपुत्रं युधिष्ठिरम् ।
पर्यपृच्छददीनात्मा कुन्तीपुत्रं सुवर्चसम् ।
'कथं जानीम भवतः क्षत्रियान्ब्राह्मणानुत' ॥

Then the king of the Panchalas called prince Yudhisthira and undepressed in mind, asked that lustrous son of Kunti: "For whom shall I know you, Kshatriyas or Brahmins?"

स तस्मै सर्वमाचख्यावानुपूर्व्येण पाण्डवः ॥

Yudhisthira told Drupada everything in sequence.

ततस्तु ते कौरवराजपुत्रा
विभूषिताः कुण्डलिनो युवानः ।
कृताभिषेकाः कृतमङ्गलक्रिया
वरस्त्रियास्ते जगृहुः करं तदा ॥

Adorned, having ear-rings, with bath and auspicious ceremonies done, those youthful sons of the Kuru king (Pandu) married then (that) excellent lady.

ततस्सङ्कर्षणश्चैव केशवश्च महाबलः ।
यादवैस्सह सर्वैश्च पाण्डवानभिजग्मतुः ।
रेमिरे पाण्डवैस्सार्धं ते पाञ्चालपुरे तदा ॥

Then Balarama and mighty Krishna with all the Yadavas came to the Pandavas and they made merry with the Pandavas in the Panchala city at that time.

विदुरस्त्वथ ताञ्छ्रुत्वा द्रौपद्या पाण्डवान्वृतान् ।
व्रीडितान्धार्तराष्ट्रांश्च धृतराष्ट्रं [विशांपते] ॥
उवाच 'दिष्ट्या कुरवो वर्धन्त' इति विस्मितः ।
'कृष्णया संवृताः पार्थाः पूजिता द्रुपदेन च' ॥

Hearing then that the Pandavas had been chosen as husbands by Draupadi and that the sons of Dhritarashtra had been stricken with shame, Vidura, with pleasant surprise, told Dhritarashtra: "Luckily, the Kurus thrive in glory. The Pandavas have been chosen as husbands by Draupadi and have been honoured by Drupada."

एतच्छ्रुत्वा तु वचनं विदुरस्य नराधिपः ।
आकारच्छादनार्थाय दिष्ट्या दिष्ट्येति चाब्रवीत् ॥

On hearing these words of Vidura, the king, to conceal his feeling, said: "Luckily luckily."

ततो दुर्योधनश्चापि राधेयश्च [विशांपते]।
धृतराष्ट्रमुपागम्य वचोऽब्रूतामिदं तदा ॥

Then, Duryodhana and Karna, approached Dhritarashtra and said these words:

'सन्निधौ विदुरस्य त्वां दोषं वक्तुं न शक्नुवः ।
विविक्तमिति वक्ष्यावः किं तवेदं चिकीर्षितम् ॥

"We are not able to criticise you in Vidura's presence; we speak (now) because we are alone: what is this you want to do?

'सपत्नवृद्धिं यत्तात मन्यसे वृद्धिमात्मनः ।
अभिष्टौषि च यत्क्षत्तुः समीपे द्विपदां वर ।
तेषां बलविघातो हि कर्तव्यस्तात नित्यशः ॥'

"You consider the prosperity of our rivals your own! You, best among men, praise (the Pandavas) in the presence of Vidura! Father, destruction of their power it is that should be our constant task."

धृतराष्ट्रः—

'अहमप्येवमेवैतच्चिकीर्षामि यथा युवाम् ।
विवेक्तुं नाहमिच्छामि त्वाकारं विदुरं प्रति ॥

Dhritarashtra—

"I too am desirous of doing this even as you are, but I do not want to disclose my intention to Vidura.

'भूय एव तु भीष्मश्च द्रोणो विदुर एव च ।
युवां च कुरुतां बुद्धिं भवेद्या नस्सुखोदया ॥'

"Again let Bhishma, Drona, Vidura and you two also think out a policy which will be productive of weal for us."

तत आनाय्य तान् सर्वान् मन्त्रयामास वै तदा ॥

Bringing then all those persons, Dhritarashtra held a consultation.

भीष्मः—

'न रोचते विग्रहो मे पाण्डुपुत्रैः कथञ्चन ।
यथैव धृतराष्ट्रो मे तथा पाण्डुरसंशयम् ॥

Bhishma—

"Hostility in any manner with the sons of Pandu is not to my liking. Surely, as Dhritarashtra is to me, so is Pandu also.

'मधुरेणैव राज्यस्य तेषामर्धं प्रदीयताम् ।
न चापि तेषां वीराणां जीवतां कुरुनन्दन ।
पित्र्योंऽशः शक्य आदातुमपि वज्रभृता स्वयम्॥'

"In love, let half of the kingdom be given to them. Nor is it possible, scion of Kuru, even for Indra himself to take away their paternal share while those warriors are alive."

द्रोणः—

'ममाप्येषा मतिस्तात या भीष्मस्य महात्मनः ॥'

Drona—

"Dear king, the opinion of the high-souled Bhishma is mine also."

विदुरः—

'प्रियं हितं च तद्वाक्यमुक्तवान् कुरुसत्तमः ।
भीष्मो, द्रोणेन बहुधा भाषितं हितमुत्तमम् ॥

Vidura—

"Bhishma, the best of the Kurus, has spoken words which are pleasing and beneficial; and what is best and salutary in various ways has been spoken by Drona.

'एतद्धि परमं श्रेयो मन्येऽहं तव भारत ॥

"Scion of Bharata! I consider this as the greatest good for you.

'यच्चाप्यशक्यतां तेषामाहतुः पुरुषर्षभौ ।
तत्तथा पुरुषव्याघ्र यतः कृष्णस्ततो जयः ॥

"And as to what those two great men said of the invincibility of the Pandavas, that is true, great man. Where Krishna is, there victory is.

'यच्च साम्नैव शक्येत कार्यं साधयितुं नृप ।
को दैवशप्तस्तत्कार्यं विग्रहेण समाचरेत् ॥

"King, which fate-accursed person will do by conflict the thing which can be achieved by conciliation itself?

'श्रुत्वा च जीवतः पार्थान् पौरजानपदा जनाः ।
बलवद्दर्शने हृष्टाः तेषां राजन् प्रियं कुरु ॥

"Hearing that the Pandavas are alive, the citizens and the country-folk are intensely eager to see them; king, do what pleases them.

'दुर्योधनश्च कर्णश्च शकुनिश्चापि सौबलः ।
अधर्मयुक्ता दुष्प्रज्ञा बाला मैषां वचः कृथाः ॥'

"Duryodhana, Karna and Sakuni are unrighteous, of vicious mind and (mere) boys; do not do what they say."

धृतराष्ट्रः—

'दिष्ट्या जीवन्ति ते पार्था दिष्ट्या जीवति सा पृथा।
दिष्ट्या द्रुपदकन्यां च लब्धवन्तो महारथाः।
त्वमेव गत्वा विदुर तानिहानय मा चिरम् ॥'

Dhritarashtra—

Luckily, the Pandavas are alive; luckily, Kunti lives; luckily, those warriors have obtained the daughter of Drupáda also. Vidura, yourself go and bring them; delay not.

एवमुक्तस्ततः क्षत्ता रथमारुह्य शीघ्रगम्।
आगात्कतिपयाहोभिः पाञ्चालान् राजधर्मवित्॥

So told, Vidura who knew the royal code, then mounted a swift chariot and in a few days, came to the Panchala country.

ददर्श पाण्डवांस्तत्र वासुदेवं च [भारत]।
वचनाद् धृतराष्ट्रस्य पप्रच्छानामयं ततः॥

There he saw the Pandavas and Krishna. He then enquired of their welfare in Dhritarashtra's name.

ततस्ते समनुज्ञाता द्रुपदेन महात्मना ।
आदाय द्रौपदीं जग्मुर्नगरं नागसाह्वयम् ॥

Then, given leave by the high souled Drupada, the Pandavas went to the city of Hastinapura, taking Draupadi.

पाण्डवानागताञ्छ्रुत्वा नागरास्तु कुतूहलात् ।
मण्डयाञ्चक्रिरे तत्र नगरं नागसाह्वयम् ॥

In their delight on hearing that the Pandavas had come, the citizens decorated the city of Hastinapura.

पृष्टास्तु कुशलप्रश्नं सर्वेण नगरेण ते ।
समाविशन्त वेश्मानि धृतराष्ट्रस्य शासनात् ॥

Enquired of their welfare by the whole city, the Pandavas took up their abodes at the behest of Dhritarashtra,

विश्रान्तास्ते महात्मानः कञ्चित्कालं सकेशवाः ।
आहूता धृतराष्ट्रेण राज्ञा शान्तनवेन च ॥

When they had rested for some time along with Krishna, the high-souled Pandavas were called by king Dhritarashtra and Bhishma.

धृतराष्ट्रः—

'भ्रातृभिस्सह कौन्तेय निबोधेदं वचो मम ।
पाण्डुना वर्धितं राज्यं पालितं शासनान्मम ॥

Dhritarashtra:—

"Son of Kunti! hearken these words of mine along with your brothers. This kingdom was developed by Pandu and protected (by him) on my behest.

'अर्धराज्यं तु संप्राप्य खाण्डवप्रस्थमाविश ।
केशवो यदि मन्येत तत्कर्तव्यमसंशयम् ॥

"Take half of the kindom and settle in Khandavaprastha. If Krishna were to approve, it must be surely done.

'अभिषेकस्य सम्भारान् क्षत्तरानय मा चिरम् ।
अभिषिक्तं करिष्यामि ह्यद्य वै कुरुनन्दनम् ॥

"Vidura, delay not; bring the things necessary for the coronation; now shall I have the scion of Kuru (Yudhisthira) crowned.

'ब्राह्मणा नैगमश्रेष्ठाः श्रेणीमुख्याश्च सर्वशः ।
आहूयन्तां प्रकृतयो बान्धवाश्च विशेषतः ॥

"Let Brahmins, the principal citizens, all the chiefs of guilds, the counsellors and (our) kinsmen especially, be called.

'अभिषेकोदकक्लिन्नं श्वेतच्छत्रेण शोभितम् ।
दृष्ट्वा कुन्तीसुतं ज्येष्ठं प्रशंसन्तु परे जनाः ॥'

"Seeing the eldest son of Kunti wet with the coronation-water and beautiful with the white umbrella, let other people (also) praise (him)."

भीष्मो द्रोणः कृपः क्षत्ता साधु साध्वित्यथाब्रुवन् ॥

Then, "Well done, well done," said Bhishma, Drona, Kripa and Vidura.

तस्मिन् क्षणे [महाराज] कृष्णद्वैपायनस्तदा ।
कारयामास विधिवत् केशवानुमते तदा ।
मूर्धाभिषिक्तं कौन्तेयं धृतराष्ट्रोऽब्रवीदिदम् ॥

At that moment, Vyasa, with Krishna's permission, crowned Yudhisthira in the prescribed manner. And Dhritarashtra spoke this :

'समक्षं वासुदेवस्य कुरूणां च समक्षतः ।
अभिषेकस्त्वया प्राप्तो दुष्प्रापो ह्यकृतात्मभिः ॥

"(Yudhisthira!) in the presence of Krishna and the Kurus, you have had the coronation that can hardly be obtained by those who have not conquered themselves.

'गच्छ त्वं खाण्डवप्रस्थं पुरं राष्ट्रं च वर्धय ॥

"Go to Khandavaprastha and bring the city and the country to prosperity."

प्रतिगृह्य तु तद्वाक्यं तस्मै सर्वे प्रणम्य च ।
प्रतस्थिरे ततो घोषसंयुक्तैस्स्यन्दनैर्वरैः ॥

Accepting those words and bowing to Dhritarashtra, all the Pandavas started then in excellent, rumbling chariots.

वासुदेवो जगन्नाथश्चिन्तयामास वासवम् ।
महेन्द्रशासनाद्गत्वा विश्वकर्मा तु केशवम् ।
प्रणम्य प्रणिपातार्हं किं करोमीत्यभाषत ॥

Vasudeva, the lord of the universe, thought of Indra. Going to Kesava at the bidding of Indra, and bowing to Him who is worthy of salutation, Visvakarman said: "What shall I do?"

वासुदेवस्तु तच्छ्रुत्वा विश्वकर्माणमूचिवान् ।
'कुरुष्व कुरुराजस्य महेन्द्रपुरसन्निभम् ।
इन्द्रेण कृतनामानमिन्द्रप्रस्थं महापुरम्' ॥

Hearing that, Vasudeva told Visvakarman: "Create for Yudhisthira the great city of Indraprastha similar to the city of Indra and named after Indra."

ततस्तु विश्वकर्मा तु चकार पुरमुत्तमम् ।
प्राकारेण च संपन्नं दिवमावृत्य तिष्ठता ॥

Visvakarman then built an excellent city, having a rampart which stood hiding the heavens.

तत्रागच्छन्द्विजा [राजन्] सर्ववेदविदां वराः ।
निवासं रोचयन्ति स्म सर्वभाषाविदस्तथा ।
वणिजश्चाययुस्तत्र सर्वशिल्पविदस्तदा ॥

Brahmins, the best among those who knew all the Vedas, came to that city; similarly those knowing all languages loved to live there; and merchants and artisans of all kinds came there.

उद्यानानि च रम्याणि नगरस्य समन्ततः ।
तटाकानि च रम्याणि बृहन्ति सुबहूनि च ॥

There were beautiful gardens around the city and there were also many beautiful and big tanks.

चातुर्वर्ण्यसमाकीर्णमिन्द्रप्रस्थं युधिष्ठिरः ।
कृतमङ्गलसत्कारैर्ब्राह्मणैर्वेदपारगैः ।
द्वैपायनं पुरस्कृत्य धौम्यस्याभिमते स्थितः ।
भ्रातृभिस्सहितो राजा केशवेन सहाभिभूः ।
तोरणद्वारसुमुखं प्रविवेश महाद्युतिः ॥

With the auspicious rites and worship performed by Brahmins who were masters of the Vedas, with Vyasa in the front and in obedience to Dhaumya, king Yudhisthira of great splendour entered, together with his brothers and Krishna, Indraprastha, which teemed with people of the four castes and was beautiful with arched gateways.

प्रविश्य भवनं राजा ततो वार्ष्णेयमब्रवीत् ।
'तव प्रसादाद्वार्ष्णेय राज्यं प्राप्तं मयाऽनघ ।
गतिस्त्वमापत्कालेऽपि पाण्डवानां च माधव ॥

After entering the palace, King Yudhisthira said to Krishna: "Immaculate Krishna, by your grace has this kingdom been obtained. In times of adversity, you are the refuge of the Pandavas."

कृष्णः—

'त्वत्प्रभावान्महाराज्यं संप्राप्तं हि स्वधर्मतः ।
पितृपैतामहं राज्यं कथं न स्यात्तव प्रभो ।
यथेष्टं पालय जगच्छश्वद्धर्मधुरं वह ॥'

Krishna—

"King, this vast kingdom has been obtained by your greatness and by your own Dharma. How can this kingdom handed down by your father and grandfather fail to be yours? Protect the world according to its wishes. Uphold Dharma for all time."

प्राप्य राज्यं महातेजास्सत्यसन्धो युधिष्ठिरः ।
पालयामास धर्मेण पृथिवीं भ्रातृभिस्सह ॥

Having obtained the kingdom, the very valorous Yudhisthira, true to his promise, together with his brothers, protected the world with Dharma.

अर्जुनश्चिन्तयामास गदेन कथितं पुरा ।
सुभद्रायाश्च माधुर्यरूपसम्पद्गुणानि च ॥

Arjuna thought of the sweetness, beauty and qualities of Subhadra (Krishna's sister), described (to him) by Gada (a brother of Krishna) long ago.

पाण्डवस्य सुभद्रायास्सकाशे तु यशस्विनः ।
समुत्पत्तिः प्रभावश्च गदेन कथितः पुरा ।
तस्मात्सुभद्रा चकमे पौरुषाद्भरतर्षभम् ॥

In Subhadra's presence (also), the birth and the might of the renowned Arjuna had been previously described by Gada. Therefore, Subhadra loved Arjuna, the illustrious scion of Bharata, for his valour.

ततः प्रीतिकरो यूनां विवाहपरमोत्सवः ।
भद्रवत्यै सुभद्रायै सप्तरात्रमवर्तत ॥

Then the great festival of marriage, which gives joy to the young, took place for seven nights for the auspicious Subhadra.

सुभद्रा सुषुवे वीरमभिमन्युं नरर्षभम् ।
कृष्णस्य सदृशं शौर्ये वीर्ये रूपे तथाऽऽकृतौ ॥

Subhadra gave birth to the heroic Abhimanyu, the best of men who was like Krishna in courage, valour, beauty and appearance.

युधिष्ठिरात्प्रतिविन्ध्यं सुतसोमं वृकोदरात् ।
अर्जुनाच्छ्रुतकर्माणं शतानीकं च नाकुलिम् ।
सहदेवाच्छ्रुतसेनमेतान्पञ्च महारथान् ।
पाञ्चाली सुषुवे वीरानादित्यानदितिर्यथा ॥

Like Aditi giving birth to the gods, Draupadi gave birth to five warriors, Prativindhya by Yudhisthira, Sutasoma by Vrikodara, Srutakarman by Arjuna,, Satanika by Nakula and Srutasena by Sahadeva.'

दिव्यगर्भोपमैः पुत्रैर्व्यूढोरस्कैर्महारथैः ।
अन्विता [राजशार्दूल] पाण्डवा मुदमाप्नुवन् ॥

The Pandavas rejoiced in the company of these valorous sons of broad chests, who looked like divine children.

ततः कतिपयाहस्य बीभत्सुः कृष्णमब्रवीत् ।
'उष्णानि कृष्ण वर्तन्ते गच्छावो यमुनां प्रति'॥

After a few days, Arjuna told Krishna: "Krishna, it is hot, let us go towards the Jumna."

आमन्त्र्य तौ धर्मराजमनुज्ञाप्य च [भारत] ।
तत्र गत्वा महात्मानौ रेमाते पार्थमाधवौ ॥

Asking for the permission of Yudhisthira and being permitted by him, the two great persons, Arjuna and Krishna, went to the Jumna and enjoyed themselves.

अभ्यगच्छत्तदा विप्रः प्रतप्तकनकप्रभः ।
सोऽब्रवीदर्जुनं चैव वासुदेवं च सात्वतम् ॥

At that time, a Brahmin, of the colour of smelted gold, approached (them); he said to Arjuna and Krishna:

'भिक्षे वार्ष्णेयपार्थौ वां पावकं मां निबोधतम् ।
स युवाभ्यां सहायाभ्यामस्त्रविद्भ्यां समागतः ।
दहेयं खाण्डवं दावमेतदन्नं वृतं मया ॥'

"I beg of you two, Arjuna and Krishna; know me as Fire; with you two, who are experts with missiles, as aids, I would burn the Khandava forest; this has been chosen by me as (my) food."

प्रादाच्चैव धनूरत्नमक्षय्यौ च महेषुधी ।
रथं च दिव्याश्वयुजं कपिप्रवरकेतनम् ॥

He gave (to Arjuna) an excellent bow and two great inexhaustible quivers, as also a chariot, fitted with celestial horses and a banner with a great monkey on it.

वज्रनाभं ततश्चक्रं ददौ कृष्णाय पावकः ॥

The god of fire then gave to Krishna a discus of adamantine nave.

ततः पावकमब्रूतां प्रहृष्टायार्जुनाच्युतौ ।
'कामं संप्रज्वलाद्यैव कल्यौ स्वः साह्यकर्मणि' ॥

Overjoyed, Arjuna and Krishna told the god of fire: "Burn as you please even now; we are ready for your help."

एवमुक्तस्स भगवान्दाशार्हेणार्जुनेन च ।
ददाह खाण्डवं दावं युगान्तमिव दर्शयन् ॥

So told by Krishna and Arjuna, the god of fire burnt the Khandava forest, as if displaying the final destruction of the world.

खाण्डवस्य विमोक्षार्थं प्रववर्ष सुरेश्वरः ।
तच्छरैरर्जुनो वर्षं प्रतिजघ्नेऽत्यमर्षितः ।

Indra sent rain for the rescue of the Khandava forest; incensed very much, Arjuna warded off that rain with his arrows.

तस्मिन्वने दह्यमाने षडग्निर्न ददाह च ।
अश्वसेनं मयं चैव चतुरश्शार्ङ्गकांस्तथा ॥

When that forest was being burnt, the fire did not burn six beings,—Asvasena (a serpent), Maya (the architect of the demons) and four Sarnga birds.

अहोभिरेकविंशद्भिर्विरराम सुतर्पितः ॥

The fire, fully satisfied, came to an end after twenty-one days.

अर्जुनो वासुदेवश्च मयोऽपि [भरतर्षभ]।
रमणीये नदीकूले सहितास्समुपाविशन् ॥

Arjuna, Krishna, and Maya sat together on a lovely river bank.

॥ इत्यादिपर्व समाप्तम् ॥

THUS ENDS THE ADI PARVA.

॥ अथ सभापर्व ॥

——:o:——

SABHA PARVA

ततोऽब्रवीन्मयः पार्थं वासुदेवस्य सन्निधौ ।
त्वया त्रातोऽस्मि कौन्तेय ब्रूहि किं करवाणि ते॥

Maya then said to Arjuna in the presence of Krishna: "Arjuna, I have been saved by you; tell me, what shall I do for you?"

चोदयामास तं कृष्णः सभा वै क्रियतामिति ।
धर्मराजमथामन्त्र्य कृष्णोऽपि द्वारकामगात् ॥

Krishna directed Maya to build a hall and taking leave of Yudhisthira, he then went to Dvaraka.

विश्रुतां त्रिषु लोकेषु दिव्यां मणिमयीं शुभाम् ।
तां तु कृत्वा सभां श्रेष्ठां विसृष्टः प्रययौ मयः ॥

Maya built an excellent hall, famous in the three worlds, wonderful, completely inlaid with precious stones and beautiful, and given leave, went away.

अथ तत्रोपविष्टेषु पाण्डवेषु महात्मसु ।
नारदस्तुमहातेजाः पप्रच्छेदं युधिष्ठिरम् ॥

Then, when the high-souled Pandavas were sitting in that hall, the supremely magnificent Narada asked this of Yudhisthira:

'कच्चिदर्थाश्च कल्पन्ते धर्मे च रमते मनः ।
कुलीनाश्चानुरक्ताश्च कृतास्ते वीर मन्त्रिणः ॥

"Are your material gains adequate? Does your mind delight in Dharma? Valorous Yudhisthira! have you made men of birth and devotion your ministers?

'कच्चिद्दुर्गाणि सर्वाणि धनधान्यायुधोदकैः ।
यन्त्रैश्च परिपूर्णानि तथा शिल्पिधनुर्धरैः ॥

"Are all the forts full with money, corn, missiles, and water, machines, artisans and archers?

'कच्चिद्विनयसंपन्नः सत्कृतस्ते पुरोहितः ॥

"Is your priest, endowed with modesty, honoured by you?

'कच्चिद्बलस्य भक्तं च वेतनं च यथोचितम् ।
संप्राप्तकाले दातव्यं ददासि न विकर्षसि ॥

"Do you give in time the proper rations and pay that ought to be given to your army, and not delay them?

'कच्चिद्विद्याविनीतांश्च नराञ्ज्ञानविशारदान् ।
यथार्हं गुणतश्चैव दानेनाभ्युपपद्यसे ॥

"Do you help with gifts according to their deserve and merits men who are disciplined by learning and celebrated in knowledge?

'कच्चिद्दारान्मनुष्याणां तवार्थे मृत्युमीयुषाम् ।
व्यसनं चाभ्युपेतानां बिभर्षि भरतर्षभ ॥

"Distinguished scion of Bharata! do you maintain the wives of men who lay down their lives and come to grief in your cause?

'कच्चिदायस्य चार्धेन चतुर्भागेन वा पुनः।
पादभागैस्त्रिभिर्वाऽपि व्ययस्संशुध्यते तव ॥

"Is your expenditure cleared with half or quarter or three quarters of your income?

कच्चिज्ज्ञातीन्गुरून्वृद्धान् वणिजश्शिल्पिनश्श्रितान्।
अभीक्ष्णमनुगृह्णासि धनधान्येन दुर्गतान् ॥

"Do you frequently help with money and grain kinsmen, teachers, old men, merchants, artists and dependents who are in distress?

कच्चिदर्थेषु संप्रौढान् हितकामाननुप्रियान्।
नापकर्षसि कर्मभ्यः पूर्वमप्राप्य किल्बिषम् ॥

"Do you refrain from removing from their offices without previously finding mistake in them those who are very efficient in their works who love your welfare and are devoted?

'कच्चिद्राष्ट्रे तटाकानि पूर्णानि च वृहन्ति च।
भागशो विनिविष्टानि न कृषिर्देवमातृका ॥

"Are tanks in your country full, big, and distributed in the several areas? Is agriculture not dependent on rains only?

'कच्चित्स्वनुष्ठिता तात वार्ता ते साधुभिर्जनैः।
वार्तायां संश्रितस्तात लोकोऽयं सुखमेधते॥

"Is your economic welfare,—agriculture, commerce, live-stock and banking—well-managed by efficient men? My son! this world flourishes in happiness, if it is well based on economic welfare.

'कच्चित्कृतं विजानीषे कर्तारं च प्रशंससि।
सतां मध्ये महाराज सत्करोषि च पूजयन्॥

"Great king, do you recognise a work done, acclaim the doer and honour him with rewards in the midst of good people?

'कच्चिदग्निभयाच्चैव सर्वं व्यालभयात्तथा।
रोगरक्षोभयाच्चैव राष्ट्रं स्वं परिरक्षसि॥

"Do you guard your entire country from fear of fire, reptiles, diseases and evil spirits?

'कच्चिदन्धांश्च मूकांश्च पङ्गून्व्यङ्गानबान्धवान्।
पितेव पासि धर्मज्ञ तथा प्रव्रजितानपि॥

"You who know Dharma! do you protect like a father the blind, the dumb, and the lame, those who are physically deficient (in other ways), those who have no kith or kin and those who have renounced the world.

'षडनर्था महाराज कच्चित्ते पृष्ठतः कृताः ।
निद्राऽऽलस्यं भयं क्रोधो मार्दवं दीर्घसूत्रता ॥

"Great king, have these six evils been discarded by you—sleep, laziness, fear, anger, softness and delay?

'पिता च त्वाह कौन्तेय पाण्डुः कौरवनन्दन ।
"समर्थोऽसि महीं जेतुं भ्रातरस्ते स्थिता वशे ।
राजसूयं क्रतुश्रेष्ठमाहरस्वेति भारत" ॥'

"Son of Kunti and scion of the Kuru race! your father Pandu told you: 'You are capable of conquering the world; your brothers are at your command. Scion of Bharata! perform Rajasuya, the greatest of sacrifices.'"

ऋषेस्तद्वचनं श्रुत्वा जगाम मनसा हरिम् ।
पाण्डवो भूतगुरवे प्राहिणोद्गतमञ्जसा ॥

Hearing those words of the sage, Yudhisthira thought of Hari (Krishna). Quickly, he despatched a messenger to the Lord of beings (Krishna).

दिशं धनपतेरिष्टामजयत्पाकशासनिः ।
भीमसेनस्तथा प्राचीं सहदेवस्तु दक्षिणाम् ।
प्रतीचीं नकुलो [राजन्] दिशं व्यजयतास्त्रवित्॥

Arjuna conquered the quarter dear to Kubera (the north); Bhima, the east; Sahadeva, the south, and Nakula, skilled in missiles, the west.

उच्चावचमुपादाय धर्मराजाय माधवः ।
धनौघं पुरुषव्याघ्रः प्रविवेश पुरोत्तमम् ॥

Taking for Yudhisthira a heap of manifold riches, Krishna, the most distinguished of men, entered the excellent city of Indraprastha.

युधिष्ठिरः—

'त्वत्कृते पृथिवी सर्वा मद्वशे कृष्ण वर्तते ।
धनं च बहु वार्ष्णेय त्वत्प्रसादादुपार्जितम् ।
अनुज्ञातस्त्वया कृष्ण प्राप्नुयां क्रतुमुत्तमम् ॥'

Yudhisthira—

"Krishna, because of you the whole world is under me; scion of the Vrishnis! by your grace, ample wealth has been amassed. Krishna, with your leave, I would like to perform the best sacrifice."

कृष्णः—

'यजस्वाभीप्सितं यज्ञं मयि श्रेयस्यवस्थिते ।
नियुङ्क्ष्व त्वं च मां कृत्ये सर्वं कर्तास्मि ते वचः ॥'

Krishna—

"Perform the sacrifice you desire when I am here for your good. Appoint me also to some work; I shall do all that you say."

अनुज्ञातस्तु कृष्णेन पाण्डवोऽरिनिबर्हणः ।
प्रेषयामास नकुलं भीष्माय [भरतर्षभ] ।
द्रोणाय धृतराष्ट्राय विदुराय कृपाय च ।
भ्रातॄणां चैव सर्वेषां येऽनुरक्ता युधिष्ठिरे ॥

Permitted by Krishna, Yudhisthira, the destroyer of his foes, sent Nakula to Bhishma, Drona, Dhritarashtra, Vidura, and

Kripa, to all his brothers and also to those who had love for Yudhisthira.

दीक्षितस्स तु धर्मात्मा धर्मराजो युधिष्ठिरः ।
जगाम यज्ञायतनं वृतो विप्रैस्सहस्रशः ।
भ्रातृभिर्ज्ञातिभिश्चैव धर्मो विग्रहवानिव ॥

Initiated, the righteous king Yudhisthira surrounded by thousands of Brahmins, his brothers and kinsmen, went to the sacrificial hall, looking verily like Dharma incarnate.

ततो भीष्मश्शान्तनवो बुद्धया निश्चित्य वीर्यवान्।
वार्ष्णेयं मन्यते कृष्णमर्हणीयतमं भुवि ॥

Then the mighty Bhishma, deciding with his knowledge, considered Krishna as the greatest of those fit to be worshipped in the world.

भीष्मः—

'एष ह्येषां समस्तानां तेजोबलपराक्रमैः ।
मध्ये तपन्निवाभाति ज्योतिषामिव भास्करः ॥'

Bhishma—

"In the midst of all these men, He shines forth, with his splendour, might and valour, blazing like the sun in the midst of the planets."

तस्मै भीष्माभ्यनुज्ञातस्सहदेवः प्रतापवान् ।
उपजह्रेऽथ विधिवद् वार्ष्णेयायार्घ्यमुत्तमम् ॥

Permitted by Bhishma, the valorous Sahadeva then brought to Krishna best articles for worship in the prescribed manner.

शिशुपालस्तु तां पूजां वासुदेवे न चक्षमे ॥

Sisupala did not brook that worship of Vasudeva.

शिशुपालः—

'अतिपश्यसि वा सर्वान्न वा पश्यसि पाण्डव ।
तिष्ठत्स्वन्येषु पूज्येषु गोपमर्चितवानसि ॥

Sisupala—

"Yudhisthira, you overlook all or do not see them at all? When there are others who deserve worship, you have honoured a cowherd!

'ननु त्वयाऽपि बोद्धव्यं यां पूजां माधवार्हसि ।
अयुक्तामात्मनः पूजां त्वं पुनर्बहुमन्यसे ॥

"Krishna, should you at least not have known what honour you deserve? You esteem an honour which you do not deserve!

'आह्वये त्वां रणं गच्छ मया सार्धं जनार्दन ।
यावदद्य निहन्मि त्वां सहितं सर्वपाण्डवैः ॥'

"I challenge you, Krishna; come for a fight with me; I shall kill you now, along with all the Pandavas."

इत्युक्त्वा प्रययौ क्षिप्रं पार्थयज्ञजिघांसया ॥

Having spoken thus, Sisupala proceeded forth, desiring to ruin the sacrifice of the Pandavas.

ततश्चक्रगदापाणिः केशवः केशिहा हरिः ।
चिच्छेद च सुनीथस्य शिरश्चक्रेण संयुगे ॥

Then, Krishna, armed with the discus and the mace, the destroyer of (the Asura) Kesin, cut off with his discus Sunitha's (Sisupala's) head in the fight.

ततः प्रववृते यज्ञः केशवेन सुरक्षितः ॥

The sacrifice then went on, protected well by Krishna.

ततस्त्ववभृथस्नातं धर्मात्मानं युधिष्ठिरम् ।
समस्तं पार्थिवं क्षत्रमुपागम्येदमब्रवीत् ॥

The whole world of kings then came and said this to the righteous Yudhisthira who had performed the ablution marking the end of the sacrifice:

'दिष्ट्या वर्धसि धर्मज्ञ साम्राज्यं प्राप्तवानसि ।
कर्मणैतेन राजेन्द्र धर्मश्च सुमहान्कृतः ।
स्वराष्ट्राणि गमिष्यामस्तदनुज्ञातुमर्हसि ॥'

"Righteous king of kings, we are glad you are prosperous; you have attained complete sovereignty. And by this sacrifice, a very great Dharma has been done by you. We shall proceed to our countries; you must give us leave."

पाण्डवा नृपतीन्सर्वानेकैकं समनुव्रजन् ।
प्रययौ पुण्डरीकाक्षस्ततो द्वारवतीं पुरीम् ॥

The Pandavas accompanied everyone of those kings, as befitting them. Then Krishna left for the city of Dvaraka.

गतेषु क्षत्रियेन्द्रेषु सर्वेषु [भरतर्षभ] ।
पाण्डवेयाभ्यनुज्ञातस्ततो दुर्योधनो नृपः ।
अपहृष्टेन मनसा जगाम गजसाह्वयम् ॥

Then, after all the kings had gone, king Duryodhana, given leave by Yudhisthira, left for Hastinapura with a depressed mind.

पार्थान्सुमनसो दृष्ट्वा मन्दः क्रोधवशानुगः ।
पितरं प्रत्युवाचेदं स्वमतिं संप्रकाशयन् ॥

Dull in spirits on seeing the Pandavas happy, Duryodhana told his father, overpowered by anger and disclosing his mind:

'न मां प्रीणाति मद्भुक्तं श्रियं दृष्ट्वा युधिष्ठिरे ।
शान्तिं न परिगच्छामि दह्यमानेन चेतसा ॥'

"Seeing Yudhisthira's prosperity, the food I eat does not please me. I have no peace, with a heart that is burning."

शकुनिः—

'यामेतामतुलां लक्ष्मीं दृष्टवानसि पाण्डवे ।
तस्याः प्राप्तावुपायं मे शृणु सत्यपराक्रम ॥

Sakuni—

"Warrior of unfailing valour! hearken to this stratagem of mine for obtaining those immense riches that you saw with Yudhisthira.

'अहमक्षेष्वभिज्ञोऽस्मि विशेषज्ञश्च देवने ।
द्यूतप्रियश्च कौन्तेयो न च जानाति देवितुम् ॥

"I am an expert with the dice and know the intricacies of gambling. Yudhisthira is fond of gambling and does not know how to play.

'नियतं तु विजेष्यामि कृत्वा तु कपटं विभो ।
आनयामि समृद्धिं तां दिव्यां चोपाह्वयस्व तम्॥'

The powerful Arjuna then saw Amaravati, the city of Indra, met Indra in person and bowed to him.

गृहीतास्त्रस्तु कौन्तेयो भ्रातॄन्सस्मार पाण्डवः ॥

After receiving the missiles, Arjuna thought of his brothers.

गते तु पाण्डवे [तात] काम्यकात्सव्यसाचिनि ।
मुदमप्राप्नुवन्तस्ते वसन्तस्तत्र तत्र ह ।
ददृशुर्विविधाश्चर्यं कैलासं पर्वतोत्तमम् ।
तस्याभ्याशे तु ददृशुर्नरनारायणाश्रमम् ॥

After Arjuna left the Kamyaka forest, the other Pandavas had no happiness; living in place after place, they saw the greatest of mountains, the Kailasa of manifold wonders, and in its vicinity, saw also the hermitage of Nara and Narayana.

तत्र ते पुरुषव्याघ्रा धनञ्जयदिदृक्षया ।
ऊषुर्नातिचिरं कालं गन्धमादनसानुषु ॥

There, in the table-lands of the Gandhamadana, those illustrious men (the Pandavas) lived for some time, wishing to see Arjuna.

आगच्छदर्जुनः प्रीतो भ्रातृभिस्सह संगतः ।
कृष्णया चैव बीभत्सुर्धर्मराजमपूजयत् ॥

Arjuna returned and joined his brothers and Draupadi in joy. He paid his respects to Yudhisthira.

समेत्य पार्थेन यथैकरात्र-
मूषुस्समास्तत्र तथा चतस्रः ।
पूर्वाश्च षट् ता दश पाण्डवानां
शिवा बभूवुर्वसतां वनेषु ॥

With Arjuna, they lived there four years in such a manner that they passed away like a single night. For them who were living in the forest, the six years they had spent previously, and these four, making ten together, passed well.

यथागतेनैव पथा समग्रा
अतीत्य दुर्गं हिमवत्प्रदेशम् ।
ततोऽभ्ययुर्यामुनमद्रिराजं
संवत्सरं तत्र वने विजह्रुः ॥

Crossing back the impassable Himalayan region along the same route by which they went, all the Pandavas then reached that part of the big mountain where the Jumna has its source; and in the forest there, they lived pleasantly for a year.

ते द्वादशं वर्षमथोपयान्तं
सरस्वतीमेत्य निवासकामाः ।
सरस्ततो द्वैतवनं प्रतीयुः
सुखं विजह्रुर्नरदेवपुत्राः ॥

Desiring to proceed to the Sarasvati and live there the twelfth year that was approaching, the princes then proceeded to the lake in the Dvaita forest and spent their time happily.

तत्रैव वसतां प्रावृडभ्यतीताऽभवच्छरत् ।
पर्वसन्धौ स्म तत्राऽऽसीत्कार्तिकी [जनमेजय] ।
तमिस्राभ्युदये तस्मिन् काम्यकं प्रययुर्वनम् ॥

To them living in that same place, the rains passed and autumn came and (then) the autumnal full-moon night. In the dark fortnight that followed, they left for the Kamyaka forest.

ततस्तान्वसतस्तत्र सहितस्सत्यभामया ।
उपायाद्देवकीपुत्रो दिदृक्षुः कुरुसत्तमान् ॥

Then, accompanied by (his wife) Satyabhama, the son of Devaki (Krishna) came to the Pandavas, the best of the Kurus, living there (in the Kamyaka forest), wishing to see them.

कृष्णः—

'धर्मः परः पाण्डव राज्यलाभात्
तस्याद्यिमाहुस्तप एव राजन् ।
सत्यार्जवाभ्यां चरता स्वधर्मं
जितस्त्वयाऽयं च परश्च लोकः ॥

Krishna—

"King Yudhisthira, Dharma is superior to the acquisition of a kingdom; of that Dharma, they say, Tapas is the root; and by you who observe your Dharma with truthfulness and honesty, this world, as well as the world beyond, has been conquered.

'सेना तवार्थेषु नरेन्द्र यत्ता
ससादिपत्त्यश्वरथा सनागा ।
दाशार्हयोधैस्तु हतारियोधं
प्रतीक्षतां नागपुरं प्रभग्नम् ॥'

"King, with horsemen, foot-soldiers, horses, chariots and elephants, the army is ready for your purposes. May you see the city of Hastinapura razed, with the enemy warriors killed by my Dasarha soldiers."

युधिष्ठिरः—

'असंशयं केशव पाण्डवानां
भवान्गतिस्त्वच्छरणा हि पार्थाः।
कालोदये तच्च ततश्च भूयः
कर्ता भवान् कर्म न संशयोऽस्ति॥

Yudhisthira—

"Without any doubt, Krishna, you are the refuge of the Pandavas; they have taken shelter under you. There is no doubt that when the proper time comes you will do this and even more.

'यथाप्रतिज्ञं विहृतश्च कालः
सर्वास्समा द्वादश निर्जनेषु।
अज्ञातचर्या विधिवत्समाप्य
भवद्गताः केशव पाण्डवेयाः॥'

"As undertaken, the period, all the twelve years, has been spent in uninhabited forests; finishing in the due manner the incognito life, the Pandavas will resort to you, Krishna."

ततस्तैस्संविदं कृत्वा द्रौपदीं परिसान्त्व्य च ।
उपावर्त्य ततश्शीघ्रैर्हयैः प्रायात्परन्तपः ॥

After conversing with them and consoling Draupadi, Krishna, the tormentor of his enemies, then returned from that place and went (to Dvaraka) by swift horses.

अनुज्ञातस्तु गान्धारिः कर्णेन सहितस्तदा ।
संवृतो भ्रातृभिस्स्त्रीभिस्तत्रतत्र वने वसन् ।
जगाम घोषानभितस्तत्र चक्रे निवेशनम् ॥

At that time, permitted (by his father) and surrounded by his brothers and ladies, Duryodhana, along with Karna, staying at different places in the forest, went round the hamlets of cowherds and camped there.

यदृच्छया च तत्रस्थो धर्मपुत्रो युधिष्ठिरः ॥

Accidentally, Yudhisthira also was there.

सेनाग्र्यं धार्तराष्ट्रस्य गन्धर्वास्समवारयन् ।
तत्र गन्धर्वराजो वै पूर्वमेव गणावृतः ॥

Gandharvas offered resistance to the van of Duryodhana's army. The king of the Gandharvas, surrounded by his retinue' had camped there earlier.

आपतन्तीं तु संप्रेक्ष्य गन्धर्वाणां महाचमूम् ।
महता शरवर्षेण राधेयः प्रत्यवारयत् ॥

Seeing the big army of the Gandharvas rushing up, Karna stemmed it with a great shower of arrows.

गन्धर्वैस्तु [महाराज] भग्ने कर्णे महारथे ।
दुर्योधनं चित्रसेनो जीवग्राहमथाग्रहीत् ॥

When the great warrior Karna was beaten back by the Gandharvas, Chitrasena (the Gandharva king) captured Duryodhana alive.

'गन्धर्वैर्ह्रियते राजा राजदाराश्च सर्वशः ।'
इति दुर्योधनामात्याः क्रोशन्तो राजगृद्धिनः ।
आर्ता दीनास्ततस्सर्वे युधिष्ठिरमुपागमन् ॥

"King Duryodhana and all his harem are being carried away by the Gandharvas." So cried Duryodhana's ministers who loved their king. Afflicted and miserable, all of them came to Yudhisthira.

भीमः—

'अस्माभिर्यदनुष्ठेयं गन्धर्वैस्तदनुष्ठितम् ।
दिष्ट्या लोके पुमानस्ति कश्चिदस्मत्प्रिये स्थितः ॥'

Bhima—

"What we ought to have done, the Gandharvas have done. Luckily, there is some one in this world who stands for what is dear to us."

एवं ब्रुवाणं कौन्तेयमिति राजाऽभ्यभाषत ।
'भवन्ति भेदा ज्ञातीनां ज्ञातिधर्मो न नश्यति ।
सुयोधनस्य मोक्षाय प्रयतध्वमतन्द्रिताः ॥

King Yudhisthira told Bhima who was talking thus: "Differences do exist among kinsmen; (but) the duty of kinsmen does not suffer (thereby). Strive without sloth to rescue, Duryodhana.

'परैः परिभवे प्राप्ते वयं पञ्चोत्तरं शतम् ।
परस्परविरोधे तु वयं पञ्चैव ते शतम् ॥'

"When there is insult from others, we are a hundred and five; when there is mutual quarrel, we are only five and they are hundred."

युधिष्ठिरवचश्श्रुत्वा समनह्यन्त पाण्डवाः ॥

Hearing Yudhisthira's words, the Pandavas got ready for fight.

ततस्तुमुलं युद्धं गन्धर्वाणां तरस्विनाम् ।
बभूव भीमवेगानां पाण्डवानां च [भारत] ॥

Then, there was a very thick battle between the powerful Gandharvas and the Pandavas of terrible force.

ततोऽर्जुनश्चित्रसेनं प्रहसन्निदमब्रवीत् ।
'किं ते व्यवसितं वीर कौरवाणां विनिग्रहे' ॥

Then Arjuna said this to Chitrasena, laughing: "You warrior, what may be your intention in capturing the Kauravas?"

चित्रसेनः—

'वनस्थान्भवतो ज्ञात्वा क्लिश्यमानाननर्हवत् ।
इमेऽवहसितुं प्राप्ता द्रौपदीं च यशस्विनीम् ।
वचनाद्देवराजस्य ततोऽस्मीहागतो द्रुतम् ॥'

Chitrasena—

"Knowing you who are suffering without deserving, to be in this forest, these men, (Duryodhana and others), came here to jeer at you and the glorious Draupadi. At the word of Indra, I hastened here."

अजातशत्रुस्तच्छ्रुत्वा गन्धर्वस्य वचस्तदा ।
मोक्षयामास तान्सर्वान् गन्धर्वान्प्रशशंस च ॥

At that time, Yudhisthira, hearing those words of the Gandharva, (Chitrasena), liberated all of them (Duryodhana and others) and praised the Gandharvas.

ततो दुर्योधनं मुक्तमिदं वचनमब्रवीत् ।
'मा स्म तात पुनः कार्षीरीदृशं साहसं क्वचित् ।
गृहान्व्रज यथाकामं वैमनस्यं च मा कृथाः ॥'

Then, Yudhisthira told the freed Duryodhana these words: "My dear Duryodhana, don't venture thus again anywhere; go home, as you please; don't be sorry."

पाण्डवेनाभ्यनुज्ञातो राजा दुर्योधनस्तदा ।
विदीर्यमाणो व्रीडावान् जगाम नगरं प्रति ॥

Given leave by the Pandavas, king Duryodhana, being torn as it were by shame, went towards his city.

पुनर्द्वैतवनं रम्यमाजगाम युधिष्ठिरः ।
अजातशत्रुमासीनं भ्रातृभिस्सहितं वने ।
आगम्य ब्राह्मणस्तूर्णं सन्तप्तश्चेदमब्रवीत् ॥

Yudhisthira came again to the beautiful Dvaita forest. An afflicted Brahmin came in haste to Yudhisthira sitting along with his brothers in that forest and said this:

'अरणीसहितं मापड़ं समासक्तं वनस्पतौ ।
तमादाय गतो राजंस्त्वरमाणो महामृगः ।
तस्य गत्वा पदं राजंस्तदानयत पाण्डवाः ॥'

"A vessel containing the Sami sticks used to kindle fire was hung in a tree. King, a big stag has taken it and sped away. Tracking it, king (and) you Pandavas, bring it back (to me).

ब्राह्मणार्थे यतन्तस्ते शीघ्रमन्वगमन्मृगम् ।
अपश्यन्तो मृगं श्रान्ता दुःखं प्राप्ता मनस्विनः ।
शीतलच्छायमागम्य न्यग्रोधं समुपाविशन् ॥

Making effort in the task of the Brahmin, the Pandavas quickly went after the deer. Not finding it, the resolute Pandavas, tired and sad, came to a banyan tree of cool shade and sat down.

ततो युधिष्ठिरो राजा नकुलं वाक्यमब्रवीत् ।
'पानीयमन्तिके पश्य तूणैः पानीयमानय' ॥

Then king Yudhisthira said to Nakuḷa: "See if there is water near by and bring (some) water in the quivers."

नकुलः प्राद्रवद्यत्र पानीयं चान्वपद्यत ।
पातुकामस्ततो वाचमन्तरिक्षात्स शुश्रुवे ॥

Nakula ran to where there was water and approached it; then, as he was desirous of drinking it, he heard an aerial voice.

यक्ष उवाच—

'मा तात साहसं कार्षीर्मम पूर्वपरिग्रहः ।
प्रश्नानुक्त्वा तु माद्रेय ततः पिब हरस्व च ॥'

A Yaksha said:

"Son, commit not any rash act; (this pond) is already in my possession. Son of Madri having answered my questions, drink and take water afterwards."

अनादृत्य तु तद्वाक्यं नकुलस्तुपिपासितः ।
अपिबच्छीतलं तोयं पीत्वा च निपपात ह ॥

Disregarding the Yaksha's words, the very thirsty Nakula drank the cool water and having drunk, fell down (dead).

सहदेवस्तथा तोयं पीत्वा च निपपात ह ।
सव्यसाची पिपासार्तः पीत्वैव निपपात ह ।
भीमोऽभ्यधावत्पानीयं पीत्वैव निपपात ह ॥

Similarly, Sahadeva drank the water and fell down; Arjuna, afflicted with thirst, drank and fell down; Bhima ran to the water, drank and fell down.

ततश्चिरगतान्भ्रातॄनथाज्ञाय युधिष्ठिरः ।
उपागम्य सरो दृष्ट्वा हतान् भ्रातॄन् विलप्य च ।
पातुकामश्च तत्तोयमन्तरिक्षात्स शुश्रुवे ।
'प्रश्नानुक्त्वा तु कौन्तेय ततः पिब हरस्व च' ॥

Finding then that the brothers had long been absent, Yudhisthira came to the lake, saw the brothers killed and wept; and as he was about to drink, he heard a voice from the skies: "Yudhisthira, after answering my questions, drink and take water."

युधिष्ठिरः—

'यथाप्रज्ञं तु ते प्रश्नान्प्रतिवक्ष्यामि पृच्छ माम् ॥'

Yudhisthira—

"To the measure of my knowledge, I will answer your questions; question me."

यक्षः—

'किंस्विदेकपदं धर्म्यं किंस्विदेकपदं यशः ?
किंस्विदेकपदं स्वर्ग्यं किंस्विदेकपदं सुखम् ?'

Yaksha—

"What is the sole means of Dharma? What is the sole means of fame? What is the sole means of heaven? What is the sole means of happiness."

युधिष्ठिरः—

'दाक्ष्यमेकपदं धर्म्यं दानमेकपदं यशः ।
सत्यमेकपदं स्वर्ग्यं शीलमेकपदं सुखम् ॥'

Yudhisthira—

"Dexterity (in the discharge of one's Dharma) is the sole means of Dharma; giving is the sole means of fame; truthfulness is the sole means of heaven; and good conduct is the sole means of happiness."

'किंस्विदात्मा मनुष्यस्य किंस्विद्दैवकृतस्सखा ?'

"Who is the soul of man? Who is (his) fate-ordained friend?"

'पुत्र आत्मा मनुष्यस्य भार्या दैवकृतस्सखा ॥

"His son is the soul of man; his wife is his fate-ordained friend."

'लाभानामुत्तमं किं स्यात्सुखानां स्यात्किमुत्तमम्?'

"What may be the greatest of gains? What may be the greatest happiness?"

'लाभानां श्रेय आरोग्यं सुखानां तुष्टिरुत्तमा ॥'

"Health is the best of gains; contentment is the greatest happiness."

'किंस्विद् धर्मपरं लोके कश्च धर्मस्सदाफलः ?
किं नियम्य न शोचन्ति कैश्च सन्धिर्न जीर्यते ?'

"What is greater than Dharma in the world? Which Dharma is fruitful for all time? Subduing which, do men not grieve? With whom does friendship never age?"

'आनृशंस्यं परं धर्मात् त्रेताधर्मस्सदाफलः ।
मनो यम्य न शोचन्ति सन्धिस्सद्भिर्न जीर्यते ॥'

"Benevolence is greater than Dharma; Vedic Dharma is fruitful for all time; subduing their minds, men grieve not; and friendship with the good never ages."

'किन्नु हित्वा प्रियो भवति किन्नु हित्वा न शोचति?
किन्नु हित्वाऽर्थवान्भवति किन्नु हित्वा सुखी भवेत्?

"Abandoning which, does man become loveable? Abandoning which, does man not grieve? Abandoning which, does man become rich? Abandoning which, will man become happy?"

'मानं हित्वा प्रियो भवति क्रोधं हित्वा न शोचति।
कामं हित्वाऽर्थवान्भवति लोभं हित्वा सुखी भवेत्॥'

"Abandoning pride, man becomes loveable; abandoning anger, he grieves not; abandoning desire, he becomes rich; abandoning avarice, he will become happy."

'तपः किंलक्षणं प्रोक्तं को दमश्च प्रकीर्तितः?
क्षमा च का परा प्रोक्ता का च ह्रीः परिकीर्तिता?

"How is Tapas defined? What is said to be self-control? What is said to be the greatest forbearance? And what is the sense of shame said to be?"

'तपस्स्वधर्मवर्तित्वं मनसो दमनं दमः ।
क्षमा द्वन्द्वसहिष्णुत्वं ह्रीरकार्यनिवर्तनम् ॥'

"Tapas is observing one's own Dharma; the control of the mind is self-control; forbearance is the capacity to put up with the pairs of opposites (heat and cold, happiness and misery and so on); and the sense of shame is turning away from what ought not to be done."

'दया च का परा प्रोक्ता किं चार्जवमुदाहृतम् ?'

"What is said to be supreme sympathy? And what is said to be straightforwardness?"

'दया सर्वसुखैषित्वमार्जवं समचित्तता ॥'

"Sympathy is wishing for the happiness of all; straightforwardness is equanimity of mind."

'कश्शत्रुर्दुर्जयः पुंसां कश्च व्याधिरनन्तकः ?
कीदृशश्च स्मृतस्साधुरसाधुः कीदृशस्स्मृतः ?'

"Which is the enemy difficult to be overcome by men? Which is the endless disease? Of what nature is a good man said to be and of what nature is a bad man said to be?"

'क्रोधस्तु दुर्जयश्शत्रुर्लोभो व्याधिरनन्तकः ।
सर्वभूतहितस्साधुरसाधुर्निर्दयस्स्मृतः ॥'

"Anger is the enemy hard to be conquered; avarice is the endless malady; the good man is one who is kind to all beings and the bad man is one who has no sympathy."

'स्नानं च किं परं प्रोक्तं दानं च किमिहोच्यते ?'

"What is said to be the greatest bath? What is said to be the greatest gift in this world?"

'स्नानं मनोमलत्यागो दानं वै भूतरक्षणम् ॥'

"Bath is the discarding of mental impurity; gift is the protection of beings."

'किमाश्चर्यं च वद मे मृता जीवन्तु बान्धवाः ?'

"And tell me, what is the wonder (of this world). Then let your dead kinsmen come to life."

'अहन्यहनि भूतानि गच्छन्तीह यमालयम् ।
शेषास्स्थावरमिच्छन्ति किमाश्चर्यमतःपरम् ॥'

"Day after day in this world, living beings pass away to the abode of Death; the rest desire to be for ever! What greater wonder than this?"

यक्षः—

'व्याख्याता मे त्वया प्रश्ना यथातत्त्वं परन्तप ।
तस्मात्त्वमेकं भ्रातॄणां यमिच्छसि स जीवतु ॥'

Yaksha—

"Tormentor of your foes! my questions have been correctly answered by you. Therefore let one of your brothers whom you desire come to life."

युधिष्ठिरः—

'व्यूढोरस्को महाबाहुर्नकुलो यक्ष जीवतु ॥'

Yudhisthira—

"Yaksha! let Nakula of broad chest and long arms come to life.

यक्षः—

'त्वं कस्मान्नकुलं राजन् सापत्नं जीवमिच्छसि ॥'

Yaksha—

"King! why do you wish Nakula alive, the son of your step-mother?"

युधिष्ठिरः—

'आनृशंस्यं चिकीर्षामि नकुलो यक्ष जीवतु ।
कुन्ती चैव तु माद्री च द्वे भार्ये तु पितुर्मम ।
उभे सपुत्रे स्यातां वै विशेषो नास्ति मे तयोः ॥'

Yudhisthira—

"I desire to be good (by making no difference); (therefore) Yaksha, let Nakula come to life; my father had two wives, Kunti and Madri; may both (of them) be with their sons; I do not make any difference between them.

यक्षः—

'यस्य तेऽर्थाच्च कामाच्च आनृशंस्यं परं मतम् ।
तस्मात्ते भ्रातरस्सर्वे जीवन्तु भरतर्षभ ॥
अहं ते जनकस्तात धर्मो मृदुपराक्रम ।
आरणेयमिदं तस्य ब्राह्मणस्य हृतं मया ॥
वर्षं त्रयोदशमिदं मत्प्रसादात्कुरूद्वहाः ।
विराटनगरे गूढा अविज्ञाताश्चरिष्यथ ॥
यद्वस्संकल्पितं रूपं तादृशं धारयिष्यथ ।
अरणीसहितं भाण्डं ब्राह्मणाय प्रयच्छत ॥'

Yaksha—

"Benevolence is regarded by you as greater than Artha and Kama; therefore, illustrious Bharata, let all your brothers come to life. My son, you who are mild in the display of your power! I am your father, God Dharma. These fire-rods of that Brahmin were carried away by me. Kuru-scions! by my grace, you will spend this thirteenth year, hidden and unknown, in the Virata capital. Take such forms as you desire for yourselves. Hand over this vessel with the fire-sticks to the Brahmin."

इत्युक्त्वाऽन्तर्दधे धर्मः पाण्डवाश्च मनस्विनः ।
आरणेयं ददुस्तस्मै ब्राह्मणाय तपस्विने ॥

Having said so, God Dharma disappeared; and the high-minded Pandavas also gave the vessel with the Sami sticks to that austere Brahmin.

॥ इति वनपर्व समाप्तम् ॥

THUS ENDS THE VANA PARVA

॥ अथ विराटपर्व ॥

VIRATA PARVA

धर्मेण तेऽभ्यनुज्ञाताः पाण्डवास्सत्यविक्रमाः ।
अज्ञातवासं वत्स्यन्तो मन्त्राय समुपाविशन् ॥

Given leave by God Dharma, the truly valiant Pandavas, who were to live the incognito life, sat for deliberation.

युधिष्ठिरः—

'सभास्तारो भविष्यामि विराटस्येति मे मतिः ।
कङ्को नाम ब्रुवाणोऽहं मताक्षस्साधुदेविता ॥'

Yudhisthira—

"I think I shall become a member of the court of king Virata. I will call myself Kanka, a knower of dice and an expert gambler."

भीमः—

'सूदोऽहं वललो नाम्ना सूपकारो नराधिप ।
उपस्थास्यामि राजानं विराटमिति रोचये ॥'

Bhima—

"King, I would like to attend upon king Virata making sauces (for him) as a cook, with the name Valala."

अर्जुनः—

'वेणीकृतशिरा भूत्वा भविष्यामि बृहन्नला ।
नृत्तं गीतं च वादित्रं दिव्यं च विविधं तथा ।
शिक्षयिष्याम्यहं राजन् विराटनगरे स्त्रियः ॥'

Arjuna—

"King, plaiting my hair, I shall become a woman (eunuch) with the name Brihannala. I will teach the women in Virata's city celestial and various other kinds of dance, and music, vocal and instrumental."

नकुलः—

'अश्वाध्यक्षो भविष्यामि विराटस्येति मे मतिः ।
दामग्रन्थीति नाम्नाऽहं कर्मैतत् सुप्रियं मम ॥'

Nakula—

"My idea is to become the groom of Virata, with the name Damagranthin; this work is very much to my liking."

सहदेवः—

'गोसंख्याता भविष्यामि विराटस्येति रोचये।
तन्त्रीपालेति मे नाम स्वयं प्रोक्तं भविष्यति ॥'

Sahadeva—

"I like to become the cowherd of Virata. Tantripala shall be the name I give myself."

द्रौपदी—

'अहं ब्रुवाणा सैरन्ध्री कुशला केशकर्मणि।
सुदेष्णां प्रत्युपस्थास्ये युष्माभिस्तत्र तस्थुषी ॥'

Draupadi—

"Calling myself Sairandhri, an adept in hair-dressing I shall, staying in Virata's court along with you, attend upon (Virata's queen) Sudeshna."

एवं तेऽन्योन्यमामन्त्र्य सङ्क्रामन्तो वनाद्वनम्।
लुब्धान्ब्रुवाणा मात्स्यस्य विषयं प्राविशंस्तदा ॥

Having told each other thus, and moving from forest to forest describing themselves as hunters, the Pandavas entered the territory of the king of the Matsyas.

अर्जुनः—

'इयं वने मनुष्येन्द्र महती दृश्यते शमी ।
अस्यामायुधमासज्य गच्छाम नगरं वयम् ॥'

Arjuna—

"King, (here) we see a big Sami tree in this forest. Leaving our weapons tied together in this tree, we shall go to this city."

तानि सर्वाणि संनह्य शमीं कृत्वा प्रदक्षिणम् ।
ततो यथासमाम्नातं नगरं प्राविशंस्तदा ॥

Tying together all their weapons, (placing them in the Sami tree), and going round the Ṣami tree, they then entered the city as previously settled.

विराटनगरे चेरुः प्रच्छन्नाः पुरुषर्षभाः ।
कर्माणि तस्य कुर्वाणा विराटनृपतेस्तदा ॥

Doing service to the king of Virata, those illustrious Pandavas lived concealed in the capital of Virata.

तस्मिन्वर्षे गतप्राये कीचको द्रुपदात्मजाम् ।
कामयामास सेनानीः प्रत्याख्यातः पदाऽवधीत्।
गृहीत्वा कीचकं भीमो मांसपिण्डमथाकरोत् ॥

When that year had almost passed, Kichaka, the Commander-in Chief of Virata, made love to Draupadi, and repudiated by her, kicked her with his foot. Bhima seized Kichaka and made him a lump of flesh.

अथ वै धार्तराष्ट्रेण प्रयुक्ता ये बहिश्चराः ।
आगम्य हास्तिनपुरं राजानमिदमब्रुवन् ॥

Then, the spies sent out by Duryodhana came to Hastinapura and informed king Duryodhana of this killing of Kichaka.

'सर्वा च पृथिवी कृत्स्ना सशैलवनकानना ।
अन्वेषिता च सर्वत्र न च पश्याम पाण्डवान् ॥
येन त्रिगर्ता निहताः कीचकेन बलीयसा ।
स हतो निशि गन्धर्वैस्स्त्रीनिमित्तं नराधिप ॥'

"King, the whole world, mountains and forests included, has been searched everywhere, and we do not find the Pandavas. That mighty Kichaka who devastated the Trigarta country has been killed in the night by some Gandharvas, on account of some woman."

दुर्योधनः—

'अज्ञातसमये ज्ञाताः प्रविशेयुः पुनर्वनम् ।
शङ्के कृष्णानिमित्तं तु भीमसेनेन कीचकः ।
गन्धर्वव्यपदेशेन हतो निशि महाबलः ॥

Duryodhana—

"If the Pandavas are found in their incognito life, they shall enter the forest again. I suspect, it is on account of Draupadi that the mighty Kichaka was killed at night by Bhimasena, under pretext of being a Gandharva.

'विराटनगरे मन्ये पाण्डवाश्छन्नचारिणः ॥

"I think, it is in Virata's capital that the Pandavas are living concealed.

'मत्स्यराष्ट्रं गमिष्यामो ग्रहीष्यामश्च गोधनम् ।
गृहीते गोधने नूनं तेऽपि योत्स्यन्ति पाण्डवाः॥'

"We will go to the Matsya country and lift the cattle. When the cattle are lifted, surely the Pandavas also will fight."

ते स्म गत्वा यथोद्दिष्टं देशं मत्स्यमहीपतेः ।
बलोत्कटा न्यगृह्णन्त गोधनानि सहस्रशः ॥

Proceeding to the territory of the Matsya king as planned, Duryodhana's men, elated with their strength, seized the cattle by thousands.

स राजा महतीं सेनां मत्स्यानां समवाहयत् ॥

The king of the Matsyas gathered a huge army.

युधिष्ठिरोऽपि धर्मात्मा भ्रातृभिस्सहितस्तदा ।
व्यूहं कृत्वा विराटस्य अन्वयुध्यत पाण्डवः ॥

And the righteous Yudhisthira also, along with his brothers, formed a squadron for Virata and fought along with others.

निवृत्य गास्ततस्सर्वाः पाण्डवास्ते हतद्विषः ।
सङ्ग्रामशिरसो मध्ये तां रात्रिं सुखिनोऽवसन् ॥

After defeating the enemies and recovering the cattle, the Pandavas spent that night in happiness in the midst of the battle-field.

याते त्रिगर्तान्मात्स्ये तु पशूंस्तान्वै परीप्सति ।
सर्वे मत्स्यानुपागम्य गोधनं जह्रुरोजसा ।
कुरवो रथवंशेन परिगृह्य समन्ततः ॥

When the king of the Matsyas had (thus) gone to the Trigarta country, wishing to regain the cattle, all the Kauravas came upon the Matsya country and surrounding with a number of chariots, carried away the cattle by force.

गवाध्यक्षस्तु सन्त्रस्तो नृपवेश्माभ्ययात्ततः ।
दृष्ट्वा भूमिञ्जयं सर्वमाचष्ट पशुकर्षणम् ।
आरुह्य प्रययौ वीरः स बृहन्नलसारथिः ॥

Alarmed, the chief of the shepherds then went to the palace, and seeing Bhuminjaya, (son of the Virata king), told him all about the cattle-raid. That warrior, Bhuminjaya, mounted (his chariot) and sallied forth, with Brihannala as the charioteer.

तदनीकमथो वीक्ष्य गजाश्वरथसङ्कुलम् ।
कर्णदुर्योधनकृपैर्गुप्तं शान्तनवेन च ।
द्रोणेन सहपुत्रेण निमील्य स्वदृशौ तदा ।
वैराटिः प्राद्रवद्भीतो विसृज्य सशरं धनुः ॥

Seeing that army then, full of elephants, horses and chariots and protected by Karna, Duryodhana, Kripa, Bhishma and Drona with his son Asvatthaman, Virata's son closed his eyes, and fled in fear, throwing down the bow and arrows.

तमन्वधावद्धावन्तं राजपुत्रं धनञ्जयः ।
विधूय वेणीं धावन्तं पाण्डवं प्रेक्ष्य सैनिकाः ।
अर्जुनेति च नेत्येव व्यवस्यन्ति न ते पुनः ॥

Arjuna ran after the fleeing prince. The soldiers (on the side of the Kauravas), seeing him running, with the plaited hair swinging about, were not able to decide whether he was Arjuna or not.

समाश्वास्य भयार्तं तमुत्तरं भरतर्षभः ।
उत्तरं सारथिं कृत्वा शमीं कृत्वा प्रदक्षिणम् ।
आयुधं सर्वमादाय ततः प्रायाद्धनञ्जयः ॥

Making the fear-stricken Uttara (Bhuminjaya, the son of Virata) take heart, Arjuna, the illustrious Bharata, made him his charioteer, went round the Sami tree, took all his weapons and then went forth (for the fight).

ततश्शङ्खमुपाध्मासीद् दारयन्निव मेदिनीम् ।
ज्याघोषं तलघोषं च कृत्वा भूतान्यमोहयत् ॥

Then, Arjuna blew the conch, as if tearing the world. He stupefied all beings by the twang of his bow-string and by the slap of his palm on his body.

भीष्मः—

'सर्वं यथावच्चरितं यद्यदेभिः प्रतिश्रुतम् ।
एवमेतद् ध्रुवं ज्ञात्वा ततो बीभत्सुरागतः ॥

Bhishma—

"All that the Pandavas undertook to do, they have done accordingly. Knowing this for certain, Arjuna has come out."

'एको हि समरे पार्थः पृथिवीं निर्दहेच्छरैः ।
भ्रातृभिस्सहितो भूत्वा किं पुनः कौरवान् रणे ॥

"Even singly, Arjuna will burn the world with his arrows in the battle; why add that, with his brothers by his side, he will burn the Kauravas in battle?

'तस्मात्सन्धिं कुरुश्रेष्ठ कुरुष्व यदि मन्यसे ॥'

"Therefore, Duryodhana, make peace (with him) if you care."

दुर्योधनः—

'नाहं राज्यं प्रदास्यामि पाण्डवेभ्यः पितामह ।
ग्रामं सेनां च दासांश्च स्वल्पं द्रव्यमपि प्रभो ।
युद्धौपचारिकं यत्तु तत्सर्वं संविधीयताम् ॥'

Duryodhana—

"Grandfather, I will not give the Pandavas the kingdom, a village, army, or servants; or even the smallest thing. Let all that is necessary for war be done."

भीष्मः प्रस्थाप्य राजानं गोधनं तदनन्तरम् ।
सेनामुख्यान्व्यवस्थाप्य व्यूहितुं संप्रचक्रमे ॥

Sending away king Duryodhana and the cattle at his back, Bhishma arranged the chiefs in the army and began to array the army.

उपायादर्जुनस्तूर्णं रथघोषेण नादयन् ॥

Raising reverberations with the noise of his chariot, Arjuna advanced swiftly.

द्वाभ्यां द्वाभ्यां तथाऽऽचार्यं द्रोणं प्रथमतः क्रमात्।
द्रोणं कृपं च भीष्मं च पृषत्कैरभ्यवादयत् ॥

Beginning with his preceptor Drona, Arjuna made salutations, in order, to Drona, Kripa and Bhishma, with two arrows each.

क्षोभयामास तत्सैन्यं कर्णं विव्याध चासकृत् ॥

Arjuna threw the army pell-mell and struck Karna frequently.

स पार्थमुक्तानविषह्य बाणान्
विहाय सङ्ग्रामशिरोऽपयातः ।
ततोऽस्त्रमस्त्रेण निवार्य तेषां
गाण्डीवधन्वा कुरुपुङ्गवानाम् ।
संमोहनं शत्रुसहोऽन्यदस्त्रं
प्रादुश्चकारैन्द्रमवारणीयम् ॥

Unable to stand the arrows shot by Arjuna, Karna fled, leaving the battle-front. Warding off every missile of those Kuru chiefs with a missile of his, the Gandiva-bowed Arjuna who could withstand his enemies, brought forth another missile, the irresistible Sammohana (the stupefying one), presided over by Indra.

निस्सत्त्ववेगाः कुरुराजसैन्याः
कुड्यांपमास्तस्थुरनीहमानाः ।
रथादवप्लुत्य विराटपुत्रो
वस्त्राण्युपादाय महारथानाम् ।
हारांश्च राज्ञां मणिभूषणानि
तूर्णं पुनस्स्वं रथमारुरोह ॥

Bereft of strength and force and without any volition, the soldiers of Duryodhana stood like walls. Jumping down from his chariot, the son of Virata gathered the garments, necklaces and jewelled ornaments of the kings and warriors (in Duryodhana's army) and quickly mounted his chariot again.

गाण्डीवधन्वा प्रहसन्कुरूणां
शङ्खं प्रदध्मौ च धनं निवर्त्य ।
गुरूंश्च सर्वानभिवाद्य बाणै-
र्न्यवर्ततोदग्रमना महात्मा ॥

Laughing at the Kauravas, the great Gandiva-bowed Arjuna blew his conch; and recovering the cattle and saluting all his elders with arrows, he returned in high spirits.

ततो निवृत्ताः कुरवो जग्मुस्ते हृतवाससः ॥

Stripped of their clothes, the Kauravas then turned back and went away.

स विजित्य धनं चापि विराटो वाहिनीपतिः ।
प्राविशन्नगरं हृष्टश्चतुर्भिस्सह पाण्डवैः ॥

The Virata king who commanded the army (which went to the Trigarta country also entered the city in glee along with the four Pandavas, after winning back the cattle.

अथोत्तरेण प्रहिता दूतास्ते शीघ्रगामिनः ।
विराटनगरं प्राप्य जयं प्रावेदयंस्तदा ॥

Then, the swift messengers sent by Uttara reached the Virata capital and announced the victory.

इतिकर्तव्यतां सर्वे मन्त्रयित्वा तु पाण्डवाः ।
न्यवसंश्चैव तां रात्रिं धर्मज्ञा धर्मवत्सलाः ॥

Consulting and settling the course of action, the Pandavas who knew and loved Dharma passed that night.

ततो द्वितीये दिवसे भ्रातरः पञ्च पाण्डवाः ।
युधिष्ठिरं पुरस्कृत्य भूमिपालासनेषु ते ।
निषेदुः पावकप्रख्यास्सत्रे धिष्ण्येष्विवाग्नयः ॥

On the second day then, the five fire-like Pandava brothers, with Yudhisthira at their head, sat on royal seats, like fires in the altars in a sacrifice.

आजगाम सभां राजा उत्तरेण सह [प्रभो] ।
स तान्दृष्ट्वा राजवेषान् पार्थिवो विस्मितोऽभवत्॥

The king came to the court hall with Uttara and was wonder-struck when he saw them in royal dress.

स्मयमानोऽब्रवीद्वाक्यमर्जुनः परवीरहा ॥

Smiling, Arjuna, the destroyer of enemy warriors, said :

'अयं कुरूणामृषभः कुन्तीपुत्रो युधिष्ठिरः ।
य एव वल्लो भीमो भीमवेगपराक्रमः ।
यश्चासीदश्वबन्धस्ते नकुलोऽयं परन्तप ।
गोसंख्यस्सहदेवश्च सैरन्ध्री द्रौपदी प्रिया ॥

"You who inflict woes on your enemies! this is the chief of the Kuru house, the son of Kunti, Yudhisthira; this Valala is Bhima of terrible force and strength; this, who was your groom, is Nakula; the cowherd is Sahadeva; and Sairandhri, our beloved wife, Draupadi."

ततोऽर्जुनस्य वैराटिः कथयामास विक्रमम् ।
तस्य तद्वचनं श्रुत्वा मात्स्यराजः प्रतापवान् ।
धनञ्जयं परिष्वज्य युधिष्ठिरमथाब्रवीत् ॥

Then, Virata's son, Uttara, told Virata of Arjuna's exploits. Hearing those words of his son, the valorous king of the Matsyas, embraced Arjuna and said to Yudhisthira:

'दिष्ट्या भवन्तस्संप्राप्तास्सर्वे कुशलिनो वनात् ।
उत्तरां प्रतिगृह्णातु सव्यसाची धनञ्जयः ।
अयं ह्यौपयिको भर्ता तस्याः पुरुषसत्तमः ॥'

"It is fortunate that you have all come from the forest hale and healthy. Let Arjuna, (the archer) who shoots arrows with both hands, accept as wife Uttara (my daughter); this best of men is the proper husband for her."

एवमुक्तो धर्मराजः पार्थमैक्षद्धनञ्जयम् ।
ईक्षितं चार्जुनो ज्ञात्वा मात्स्यं वचनमब्रवीत् ॥

So told, Yudhisthira looked at Arjuna. Understanding the look, Arjuna said these words to the Matsya king:

'प्रतिगृह्णाम्यहं राजन् स्नुषां दुहितरं तव ।
अन्तःपुरेऽहमुषितो विश्वस्ता पितृवन्मयि ।
आचार्यवच्च मां नित्यं मन्यते दुहिता तव ।
स्वस्रीयो वासुदेवस्य साक्षाद्देवसुतो यथा ।
अभिमन्युर्महाबाहुः पुत्रो मम विशांपते ।
जामाता तव युक्तो वै भर्ता च दुहितुस्तव ॥'

"King! I shall accept your daughter as my daughter-in-law. I have lived in the harem and she has moved with me in confidence as with a father; also, your

daughter regards me always as her teacher. Nephew of Krishna and looking verily like the son of god, my son, the mighty Abhimanyu is a fitting son-in-law for you and a fitting husband for your daughter."

दूतान्सर्वेषु मित्रेषु वासुदेवे च [भारत]।
प्रेषयामास कौन्तेयो विराटश्च महीपतिः ॥

Yudhisthira and king Virata sent messengers to all their friends and to Krishna.

युद्धात्प्रयाताः कुरवो हि मार्गे
समादिशन्दूतमथो समग्राः ।
स चाब्रवीद्धर्मराजं समेत्य
युधिष्ठिरं पाण्डवमुग्रवीर्यम् ॥

Departing from the battle, the Kauravas, all of them, commissioned then a messenger while on the way. The messenger reached Yudhisthira and told that son of Pandu of formidable heroism:

'धनञ्जयेनासि पुनर्वनाय
प्रव्राजितस्समये तिष्ठ पार्थ ।
त्रयोदशे ह्येव किरीटमाली
संवत्सरे पाण्डवेयोऽद्य दृष्टः ॥'

"Yudhisthira, you have again been banished to the forest through Arjuna; abide by the condition; even in the (course of the) thirteenth year, Arjuna has been, just now, found out."

ततोऽब्रवीद्धर्मसुतः प्रहस्य
'क्षिप्रं गत्वा ब्रूहि सुयोधनं तम् ।
पितामहश्शान्तनवो ब्रवीतु
पूर्णो न पूर्णोऽद्य त्रयोदशो नः ॥'

Yudhisthira then said laughing: "Go quick and tell that Duryodhana: 'Let our grandfather Bhishma say whether our thirteenth year is now completed or not.'"

तेनैवमुक्तस्स निवृत्य दूतो
दुर्योधनं प्राप्य शशंस तत्त्वम् ॥

So directed by Yudhisthira, the messenger returned and reaching Duryodhana stated the fact.

संमन्त्र्य रात्रौ बहुभिस्सुहृद्भिः
भीष्मोऽब्रवीद्धार्तराष्ट्रं महात्मा ।
'तीर्णप्रतिज्ञेन धनञ्जयेन
विष्फारितं गाण्डिवमाजिमध्ये ।
नैच्छन्त्यसत्येन सुरेन्द्रलोकं
पाण्डोस्सुता ब्रह्मणश्चापि लोकम्' ॥

Consulting with the many friends in the night, the high-souled Bhishma told Duryodhana: "The Gandiva was twanged in the midst of the battle by Arjuna who had observed the condition (of twelve years of exile and a year of incognito life). The sons of Pandu do not want to enjoy the world of the king of gods or even the world of Brahma through untruth.

सञ्चिन्त्य सर्वे सहितास्सुहृद्भि-
स्सपार्थिवास्स्वानि गृहाणि जग्मुः ॥

After thinking this over well, all of them, with their friends and king Duryodhana, went to their homes.

ततस्त्रयोदशे वर्षे निवृत्ते पञ्च पाण्डवाः ।
उपप्लाव्ये विराटस्य वासं चक्रुः पुरोत्तमे ॥

Then, when the thirteenth year had ended, the five Pandavas took their abode in the excellent city of Upaplavya in Virata's territory.

तस्मिन्काले निशम्याथ दूतवाक्यं जनार्दनः ।
अभिमन्युं समादाय रामेण सहितस्तदा ।
सर्वयादवमुख्यैश्च विराटनगरं ययौ ॥

At that time, hearing the words of the messenger, Krishna, taking along Abhimanyu and accompanied by Balarama and all the chief Yadavas, went to the city of the Virata king.

मात्स्येन सहितास्सर्वे प्रत्युद्याता जनार्दनम् ।
ववन्दुः पादयोस्सर्वे आनन्दाश्रुपरिप्लुताः ॥

Along with the king of the Matsyas, all the Pandavas went forth to receive Krishna and overflowing with tears of joy, they bowed at his feet.

पाण्डवाः—

'तव कृष्ण प्रसादाद्धि वर्षाण्येतानि सर्वशः।
उषितास्स्मो जगन्नाथ त्वं नाथो नो जनार्दन।
रक्षस्व देवदेवेश त्वामार्य शरणं गताः॥'

Pandavas—

"Krishna, by your grace, we have lived through all these years; you are our lord; master of the god of gods, protect us; noble Krishna, we have taken refuge under you."

तान्वन्दमानान्सहसा परिष्वज्य जनार्दनः।
यथार्हं पूजयामास मुदा परमया युतः॥

Embracing at once the Pandavas who were saluting him, Krishna honoured them as befitting them, with greatest joy.

कृष्णा च देवकीपुत्रं ववन्दे पादयोस्तथा।
तामुद्यम्य सुकेशान्तां नयने परिमृज्य च।
उवाच वाक्यं देवेशस्सर्वयादवसन्निधौ॥

Similarly, Draupadi also bowed at the feet of Krishna. Lifting that Draupadi of fine tresses, and wiping the tears off her eyes, Krishna said in the presence of all the Yadavas:

'मा शोकं कुरु कल्याणि धार्तराष्ट्रान्समाहितान् ।
अचिराद् घातयित्वाऽहं पार्थेन सहितः क्षितिम् ।
युधिष्ठिराय दास्यामि यातु ते मानसो ज्वरः ॥'

"Blessed lady! grieve not; I, along with Arjuna, will kill before long all the sons of Dhritarashtra united together, and give the kingdom to Yudhisthira; let your mental anguish disappear."

ततश्शङ्खा मृदङ्गाश्च नेदुर्मात्स्यस्य वेश्मनि ॥

Then, conches and drums sounded in the palace of the Matsya king.

विराटो नृपतिश्श्रीमान् सौभद्रायाभिमन्यवे ।
तां सुतामुत्तरां दत्त्वा मुमुदे परमं तदा ॥

The king of Virata of vast riches rejoiced very much at that time, giving his daughter Uttara in marriage to Abhimanyu, the son of Subhadra.

॥ इति विराटपर्व समाप्तम् ॥

THUS ENDS THE VIRATA PARVA

॥ अथ उद्योगपर्व ॥

UDYOGA PARVA

कृत्वा विवाहं तु कुरुप्रवीरा-
स्तदाऽभिमन्योर्मुदितास्सपक्षाः ।
विश्रम्य रात्रावुषसि प्रतीता-
स्सभां विराटस्य ततोऽभिजग्मुः ॥

After celebrating the marriage of Abhimanyu, the renowned heroes of the Kuru house, the Pandavas, along with their friends and kinsmen, rested for the night in happiness, and proceeded in the morning to the assembly hall of king Virata.

कथान्तमासाद्य च माधवेन
सङ्घट्टिताः पाण्डवकार्यहेतोः ।
ते राजसिंहास्सहिता ह्यशृण्वन्
वाक्यं महार्थं सुमहोदयं च ॥

At the end of their chat, those great kings urged by Krishna regarding the business of the Pandavas, listened in a body to his words of great import, productive of very great good.

कृष्णः—

'सर्वैर्भवद्भिर्विदितं यथाऽयं
युधिष्ठिरस्सौबलेनाक्षवत्याम् ।
जितो निकृत्याऽपहृतं च राज्यं
वनप्रवासे समयः कृतश्च ॥

Krishna—

"It is known to you all how Yudhisthira was defeated through deceit by Sakuni in the game of dice, how the kingdom was seized, and how the condition regarding forest life was imposed.

'एवं गते धर्मसुतस्य राज्ञो
दुर्योधनस्यापि च यद्धितं स्यात् ।
तच्चिन्तयध्वं कुरुपाण्डवानां
धर्म्यं च युक्तं च यशस्करं च ॥'

"In this situation, think out what will be beneficial to Yudhisthira and also to king Duryodhana; what will be proper, what will bring glory to the Kauravas and the Pandavas and will be consistent with Dharma."

निशम्य वाक्यं तु जनार्दनस्य
समाददे वाक्यमथाग्रजोऽस्य।
'प्रियं च मे स्याद्यदि तत्र कश्चिद्
व्रजेच्छमार्थं कुरुपाण्डवानाम्।
अयुद्धमाकाङ्क्षत कौरवाणां
साम्नैव दुर्योधनमाश्वसध्वम्॥'

Hearing Krishna's words, his elder brother (Balarama) spoke: "I shall be pleased if somebody would go there for securing peace between the Kauravas and the Pandavas; wish for settlement without war with the Kauravas; conciliate Duryodhana by pacific means alone."

द्रुपदः—
'न हि दुर्योधनो राज्यं मधुरेण प्रदास्यति।
मृदुं वै मन्यते पापो भाषमाणमशक्तिकम्।
एतच्चैव करिष्यामो यत्नश्च क्रियतामिह॥

Drupada—

"Duryodhana will not give up the kingdom for sweet peace; the evil fellow takes to be an impotent one who talks mildly; this policy of peace also we will adopt and let effort (for war) also be made in this affair.

'अयं च ब्राह्मणो विद्वान् मम राजन् पुरोहितः ।
प्रेष्यतां धृतराष्ट्राय वाक्यमस्मै प्रदीयताम् ॥'

"King, let this learned Brahmin, my priest, be sent to Dhritarashtra; let a message be given to him."

द्रुपदेनैवमुक्ते तु वृष्णिसिंहोऽब्रवीदिदम् ।
'एतच्च पूर्वं कार्यं नः सुनीतिमभिकाङ्क्षताम् ॥

When Drupada spoke thus, Krishna, the greatest of the Vrishnis, said this: "This (negotiation for peace) is to be done first by us who want to adopt a sound policy."

'ते विवाहार्थमानीता गमिष्यामो गृहान्प्रति ।
स भवान्प्रेषयत्वद्य पाण्डवार्थकरं वचः ॥'

"We who have been brought here for the marriage shall go home; you (Drupada), send now a message that will accomplish the object of the Pandavas."

ततस्सत्कृत्य वार्ष्णेयं पाञ्चाल्यस्स्वपुरोहितम् ।
कुरुभ्यः प्रेषयामास युधिष्ठिरमते स्थितः ॥

Then, bidding farewell to Krishna with honours, king Drupada, according to Yudhisthira's idea, sent his priest to the Kauravas.

धृतराष्ट्रात्मजो राजा गूढैः प्रणिहितैश्चरैः ।
स श्रुत्वा माधवं यान्तं द्वारकामभ्ययात्पुरीम् ।
तमेव दिवसं चापि जगामाशु धनञ्जयः ॥

King Duryodhana, hearing through secretly set spies that Krishna was going (to his place) went to the city of Dvaraka. The same day, Arjuna also hurried (to Dvaraka).

सुप्तं ददृशतुः कृष्णं शयानं चाभिजग्मतुः ॥

They saw Krishna asleep and approached him, even as he was lying so.

दुर्योधनस्तु प्रथमं वासुदेवमुपाश्रयत् ।
उच्छीर्षतश्च कृष्णस्य निषसाद वरासने ।
ततः किरीटी पश्चार्धे प्रह्वोऽतिष्ठत्कृताञ्जलिः ॥

Duryodhana, however, reached Krishna first and sat on an excellent seat at his head. Arjuna then stood with folded hands and body bent in reverence at Krishna's feet.

प्रतिबुद्धस्स वार्ष्णेयो ददर्शाग्रे किरीटिनम् ।
सिंहासनगतं पश्चाद् दृष्टवान् प्रतिपूज्य तौ ।
तदागमनजं हेतुं पप्रच्छ मधुसूदनः ॥

Waking up, Krishna saw Arjuna first; and he saw afterwards Duryodhana who was seated on the throne. Receiving the two, Krishna asked the cause of their arrival.

ततो दुर्योधनः कृष्णमुवाच प्रहसन्निव ।
'विग्रहेऽस्मिन्भवान्साह्यं मम दातुमिहार्हति ॥
समं हि भवतस्सख्यं मम चैवार्जुनेऽपि च ।
अहं चाभिगतः पूर्वं त्वामद्य मधुसूदन ॥'

As if laughing, Duryodhana said to Krishna then: "You must give me assistance in this war; equal is your friendship with me and with Arjuna; and Krishna, I sought you first now."

कृष्णः—

"भवानभिगतः पूर्वं दृष्टो राजन् धनञ्जयः ।
साहाय्यमुभयोरेव करिष्यामि सुयोधन ॥

Krishna—

"King, you came first; Arjuna was seen first; Duryodhana, to both shall I render assistance.

'प्रवारणं तु बालानां पूर्वं कार्यमिति श्रुतिः ॥

"The youngsters must first be satisfied; so have we heard.

'मत्संहननतुल्यानां गोपानामर्बुदं महत् ।
नारायणा इति ख्याता भवन्त्वेकस्य सैनिकाः ॥

"Vast multitudes of shepherds with bodies equal to mine and famed as Narayanas—let them be soldiers for one.

'अयुध्यमानस्सङ्ग्रामे न्यस्तशस्त्रोऽहमेकतः ॥

"On the other side, myself not fighting in the battle, my weapons laid aside.

'आभ्यामन्यतरं पार्थ यत्ते हृद्यतरं मतम् ।
तद्वृणीतां भवानग्रे प्रवार्यस्त्वं हि धर्मतः ॥'

"Of these two, that which you, Arjuna, view as dearer to you, you choose first; for, according to principle, your wish must be fulfilled first."

एवमुक्तस्तु कृष्णेन कुन्तीपुत्रो धनञ्जयः ।
अयुध्यमानं सङ्ग्रामे वरयामास केशवम् ॥

Thus addressed by Krishna, Arjuna chose Krishna who would not fight in the war.

दुर्योधनस्तु तत्सैन्यं सर्वमावारयत्तदा ।
कृष्णं चापहृतं ज्ञात्वा संप्राप परमां मुदम् ॥

And Duryodhana chose the whole of Krishna's army; seeing Krishna deprived (of his army), he was immensely pleased.

अर्जुनः—

'सारथ्यं तु त्वया कार्यमिति मे मानसं सदा ।
चिररात्रेप्सितं कामं तद् भवान् कर्तुमर्हति ॥'

Arjuna—

"'You must be my charioteer.' So has my mind wished always. That long-cherished wish, you must fulfil."

कृष्णः—

'सारथ्यं ते करिष्यामि कामस्संपद्यतां तव ॥'

Krishna—

"I will drive your chariot; let your wish be realised."

एवं प्रमुदितः पार्थः कृष्णेनायाद्युधिष्ठिरम् ॥

Delighted very much in this manner, Arjuna went to Yudhisthira with Krishna.

शल्यश्श्रुत्वा तु दूतानां सैन्येन महता वृतः ।
शनैर्विश्रामयन्सेनां स ययौ यत्र पाण्डवः ॥

Hearing from the messengers, Salya, surrounded by a big army, proceeded to where Yudhisthira was, giving rest to his army little by little (on the way).

कारयामास पूजार्थं तस्य दुर्योधनस्सभाः ।
संप्रहृष्टो यदा शल्यो दिदित्सुरपि जीवितम् ।
गूढो दुर्योधनस्तत्र दर्शयामास मातुलम् ।
परिष्वज्याब्रवीत् प्रीत इष्टार्थो व्रियतामिति ॥

Duryodhana caused camp-pavilions to be built for honouring him. At the time when the overjoyed Salya was desiring to give even his life, Duryodhana, who was hiding there, showed himself to his uncle*; embracing him, Salya, who was pleased, said: "Ask what you desire."

दुर्योधनः—

'सर्वसेनाप्रणेता वै भवान् भवितुमर्हति ॥

Duryodhana—

"You must be the commander of all my forces."

कृतमित्यब्रवीच्छल्यः स तथाऽयात् स्वकं पुरम् ।
ततस्त्वामन्त्र्य कौन्तेयान् शल्यो मद्राधिपस्तदा ।
जगाम सबलश्श्रीमान् दुर्योधनम् [अरिन्दम] ॥

"Yes," said Salya; Duryodhana went to his own city; then, taking leave of the Pandavas, Salya, the flourishing king of the Madras, went over to Duryodhana, along with his army.

---

* Salya, king of the Madras, and brother of Madri, was the maternal uncle of the Pandavas and thus, indirectly, of Duryodhana also.

इतश्चेतश्च पाण्डूनां समाजग्मुर्महात्मनाम् ।
अक्षौहिण्यस्तु सप्तैव विविधध्वजसङ्कुलाः ॥

There came to the great Pandavas from every quarter seven Akshauhinis* of armies, thick with manifold banners.

कृतवर्मा च हार्दिक्यो दुर्योधनमुपागमत् ॥

Kritavarman (a Yadava chief), son of Hridika, joined Duryodhana.

एवमेकादशावृत्तास्सेना दुर्योधनस्य ताः ॥

The armies which thus turned up for Duryodhana were eleven Akshauhinis.

यस्स पाञ्चालराजेन प्रेषितः कौरवान्प्रति ।
स च कौरव्यमासाद्य पृष्ट्वा चैवमनामयम् ।
सर्वसेनाप्रणेतॄणां मध्ये वाक्यमुवाच ह ॥

And he who was sent on embassy by king Drupada to the Kauravas,—he reached Dhritarashtra, and after enquiring of his health, said these words in the midst of all the generals:

---

* An Akshauhini is an unit of army consisting of 21,870 elephants, 21,870 chariots, 65,610 horse and 1,09,350 foot.

'साम्नैव कुरुभिस्सन्धिमिच्छन्ति कुरुपुङ्गवाः ।
ते भवन्तो यथाधर्मं यथासमयमेव च ।
प्रयच्छन्तु प्रदातव्यं मा वः कालोऽत्यगादयम्॥'

"Through peaceful means only do the illustrious Pandavas] desire peace with the Kauravas; therefore, in keeping with Dharma and the [agreement, may you give what ought to be given; let there be no delay."

धृतराष्ट्रः—

'पाण्डवानां हितं चैव सर्वस्य जगतस्तथा ।
चिन्तयित्वा तु पार्थेभ्यः प्रेषयिष्यामि सञ्जयम्।
स भवान्प्रतियात्वद्य पाण्डवानेव मा चिरम् ॥

Dhritarashtra—

"Thinking out what will be good for the Pandavas and for the whole world, I will send Sanjaya to the Pandavas; may you therefore return without delay to the Pandavas themselves."

'प्राप्तानाहुस्सञ्जय पाण्डुपुत्रान्
उपप्लाव्ये तान्विजानीहि गत्वा ।
जनार्दनं युयुधानं विराटम्
अनामयं मद्वचनेन पृच्छेः ॥

(Addressing Sanjaya)—

"Sanjaya! people say that the sons of Pandu have come to Upaplavya; go and find them; on my word, enquire of Krishna, Yuyudhana (Satyaki, the Yadava chief) and Virata concerning their health.

'यद्यत्तत्र प्राप्तकालं परेभ्य-
स्त्वं मन्येथाः पाण्डवानां हितं च ।
तद् भाषेथास्सञ्जय राजमध्ये
न मूर्च्छयेद्यन्न च युद्धहेतुः ॥'

"Sanjaya! speak there in the midst of kings what you think would be in keeping with the time with reference to the other party and beneficial to the Pandavas and what will not infuriate them or cause war."

राज्ञस्तु वचनं श्रुत्वा स आसाद्य युधिष्ठिरम् ।
अभिवाद्य ततः पूर्वं सूतपुत्रोऽभ्यभाषत ॥

Hearing the words of king Dhritarashtra, Sanjaya reached Yudhisthira, bowed and then spoke:

'दिष्ट्या राजंस्त्वामरोगं प्रपश्ये
सहायवन्तं च महेन्द्रकल्पम् ।
अनामयं पृच्छति त्वाऽऽम्बिकेय-
श्शमं राजा धृतराष्ट्रोऽभिनन्दन् ॥'

"I am glad to see you, king, in health, having allies and looking like the great Indra himself; king Dhritarashtra enquires of your welfare, approving pacific settlement."

युधिष्ठिरः—

'स चेदेतां प्रतिपद्येत बुद्धिं
न नश्येयुस्सञ्जय धार्तराष्ट्राः ।
शान्तिं गमिष्यामि यथा त्वमात्थ
महायशाः केशवस्तद्ब्रवीतु ।

वासुदेवस्तूभयोरर्थकामो
नातिक्रामे वचनं केशवस्य ॥'

Yudhisthira—

"If that Dhritarashtra should take that view, Sanjaya, his sons will not be lost; as you say, I will become pacific; let (this) Krishna of great fame give his opinion; he is one who desires the welfare of both and I do not transgress his word."

कृष्णः—

'अविनाशं सञ्जय पाण्डवाना-
मिच्छाम्यहं भूतिमेषां प्रियं च ।
तथा राज्ञो धृतराष्ट्रस्य सूत
समाशंसे बहुपुत्रस्य वृद्धिम् ॥

Krishna—

"Sanjaya, I wish for the Pandavas what will not be their ruin, what will be their prosperity and what will please them; even so, I wish for the prosperity of king Dhritarashtra of many sons.

'स्वयं त्वहं प्रार्थये तत्र गन्तुं
समाधातुं कार्यमेतद्विपन्नम् ।
अहापयित्वा यदि पाण्डवार्थं
शमं कुरूणामपि चेच्छकेयम् ।
पुण्यं च मे स्याच्चरितं महोदयं
मुच्येरंश्च कुरवो मृत्युपाशात् ॥

"I myself wish to go there in person to set aright this affair that has gone wrong. If, without spoiling the cause of the Pandavas, I am able to secure peace for the Kauravas, meritorious and highly fruitful will the part I play be and freed indeed will the Kauravas be from the noose of death.

'स्थिताश्शुश्रूषितुं पार्थाः स्थिता योद्धुमरिन्दमाः ।
यत्कृत्यं धृतराष्ट्रस्य तत्करोतु नराधिपः ॥'

"Ready are the Pandavas to serve; ready are they, the subduers of enemies, to fight; what king Dhritarashtra wants to do, let him do."

युधिष्ठिरः—

'गावल्गणे कुरून्गत्वा धृतराष्ट्रं महाबलम् ।
ब्रूयाश्चैनं त्वमासीनं कुरुभिः परिवारितम् ॥

Yudhisthira—

"Sanjaya, go to the Kauravas and tell the mighty Dhritarashtra, sitting in the midst of the Kauravas:

"तव प्रसादाद् बालास्ते प्राप्ता राज्यमरिन्दम ।
राज्ये तान्स्थापयित्वाऽग्रे नोपेक्षस्व विनश्यतः ।
तात संहत्य जीवामो द्विषतां मा वशं गमः ॥"

'Vanquisher of your enemies! as boys we obtained kingdom by your grace; having established us on the throne once, do not neglect us to perish; father! united, we shall live; fall not a prey to your enemies.'

'अभिवाद्य च वक्तव्यस्ततोऽस्माकं पितामहः ।
"स त्वं कुरु तथा तात स्वमतेन पितामह ।
यथा जीवन्ति ते पौत्राः प्रीतिमन्तः परस्परम् ॥"

"After saluting, our grandfather, Bhishma, must be told this: 'Grandfather, act according to your view in such a manner that your grandsons may live in mutual affection."

'तथैव विदुरं ब्रूयाः कुरूणां मन्त्रकारिणम् ॥

"In the same manner, you shall speak to Vidura, the counsellor of the Kauravas."

'अथ दुर्योधनं ब्रूया अनुनीय पुनःपुनः ॥

"Then shall you tell Duryodhana, conciliating him again and again:

"यच्चः प्रव्राजयेस्सौम्य अजिनैः प्रतिवासितान् ।
यत्कुन्तीं समतिक्रम्य कृष्णां केशेष्वधर्षयत् ।
दुःशासनस्तेऽनुमते तच्चास्माभिरुपेक्षितम् ॥

'Good man, that you sent us clad in skins into exile, that, ignoring Kunti (our mother), Dussasana, with your permission, insulted Draupadi by dragging her by the hair,—these have been endured by us.

"अथोचितं स्वकं भागं लभेमहि परन्तप ॥

"May we then get our own proper share, you tormentor of enemies.

"निवर्तय परद्रव्याद् बुद्धिं गृद्धां नरर्षभ ।
शान्तिरेवं भवेद्राजन् प्रीतिश्चैव परस्परम् ॥

'Great man, turn your avaricious mind away from others' property. King, there will be peace thus and mutual love also.

"भ्रातॄणां देहि पञ्चानां पञ्च ग्रामान्सुयोधन ।
सर्वे सुमनसस्तात शाम्याम भरतर्षभ ॥"

'Duryodhana, give to us, the five brothers, five villages; illustrious scion of Bharata! with a good heart, let all of us settle down in peace.'

'अलमेव शमायास्मि तथा युद्धाय सञ्जय ॥'

"Sanjaya, equal am I to peace and war as well."

पार्थानामन्त्रयामास केशवं सञ्जयस्तदा ।
याति स्म हास्तिनपुरं निशाकाले [परन्तप] ॥

Sanjaya took leave of the Pandavas and Krishna (and) went to Hastinapura in the night.

तस्यां रजन्यां व्युष्टायां सूतस्योपदिदृक्षया।
शुश्रूषमाणाः पार्थानां वाचो धर्मार्थसंहिताः।
धृतराष्ट्रमुखास्सर्वे ययू [राजन्] सभां शुभाम्॥

As that night ended and day dawned, all (the Kauravas) headed by Dhritarashtra went to the beautiful assembly-hall, wishing to see Sanjaya and hear the righteous and profitable words of the Pandavas.

सञ्जयः—

'दुर्योधनो वाचमिमां शृणोतु
यदब्रवीदर्जुनो योत्स्यमानः॥

Sanjaya—

"Let Duryodhana hear these words which the great Arjuna, who is going to fight, said:

"आशंसेऽहं वासुदेवद्वितीयो
दुर्योधनं सानुबन्धं निहन्तुम्॥

'With Krishna alone as my aid, I hope to annihilate Duryodhana along with his followers.

'अनालब्धं जृम्भति गाण्डिवं धनुः
अनाहता कम्पति मे धनुर्ज्या ।
बाणाश्च मे तूणमुखाद्विसृत्य
मुहुर्मुहुर्गन्तुमुशन्ति चैव ॥

"Unlifted, my Gandiva bow jumps up; undrawn, my bowstring throbs; frequently coming out of the quiver, my arrows long to shoot.

'ये वै जय्याः समरे सूत लब्ध्वा
देवानपीन्द्रप्रमुखान्समेतान् ।
वैर्मन्यते कलहं संप्रसह्य
स धार्तराष्ट्रः पश्यत मोहमस्य ॥

"Sanjaya, those who would be triumphant even when they have against them on the battle-field (or fight) all the gods united together and headed by Indra, with them this Duryodhana wants to force a quarrel; see his folly.

'वृद्धो भीष्मश्शान्तनवः कृपश्च
द्रोणस्सपुत्रो विदुरश्च धीमान् ।
एते सर्वे यद् वदन्ते तदस्तु
आयुष्मन्तः कुरवस्सन्तु सर्वे ॥'

"Venerable Bhishma, Kripa, Drona with his son, the wise Vidura—let that which all these persons say be done; let all the Kauravas be long-lived."

दुर्योधनमिदं वाक्यं भीष्मश्शान्तनवोऽब्रवीत् ॥

Bhishma addressed these words to Duryodhana:

'वासुदेवार्जुनौ वीरौ समवेतौ महारथौ ।
नरनारायणौ देवाविति ह्योवाच नारदः ॥

"The two heroic warriors united together, Krishna and Arjuna, are the divine Narayana and Nara; so hath Narada said:

'शङ्खचक्रगदाहस्तं यदा द्रक्ष्यसि केशवम् ।
पर्याददानं चास्त्राणि भीमधन्वानमर्जुनम् ।
दुर्योधन तदा तात स्मर्तासि वचनं मम ॥'

"When you see Krishna with his conch, discus and mace in his hands and the terrible-bowed Arjuna wielding the missiles, then, Duryodhana, will you remember my words."

कर्णः—

'अहं हि पाण्डवान्सर्वान्हनिष्यामि रणे स्थितान् ।
प्राग् विरुद्धैश्शमं सद्भिः कथं वा क्रियते पुनः ॥'

Karna—

"I will kill the Pandavas standing on the field of battle. How can peace be made with those who were foes before?"

कर्णस्य तु वचःश्रुत्वा भीष्मश्शान्तनवः पुनः ।
धृतराष्ट्रं महाराजमाभाष्येदं वचोऽब्रवीत् ॥

Hearing Karna's words, Bhishma, addressing king Dhritarashtra, said again these words:

'यदयं कत्थते नित्यं हन्ताऽहं पाण्डवानिति ।
नायं कलाऽपि संपूर्णा पाण्डवानां महात्मनाम्॥

"This Karna who brags every day that he would kill the Pandavas is not even a full one-sixteenth of the great Pandavas.

अनयो योऽयमागन्ता पुत्राणां ते दुरात्मनाम् ।
तदस्य कर्म जानीहि सूतपुत्रस्य दुर्मतेः ॥

"Know the calamity that is imminent to your evil sons, the handiwork of this evil-minded son of a driver.

'विराटनगरे सर्वानभियातो धनञ्जयः ।
प्रमथ्य चाच्छिनद्वासः किमयं प्रोषितस्तदा ॥

"Arjuna attacked (us) all in the city of Virata and routing (us), snatched the clothes; was this Karna away elsewhere at that time?

'गन्धर्वैर्घोषयात्रायां ह्रियते यत्सुतस्तव ।
क्व तदा सूतपुत्रोऽभूद् य इदानीं वृषायते ।
ननु तत्रापि पार्थेन गन्धर्वास्ते पराजिताः ॥'

"When your son was being carried away by the Gandharvas during his visit to the cattle-farms, where was this son of the driver who now bellows like a bull? Oh! there again, the Gandharvas were vanquished by Arjuna!"

द्रोणः—

'यदाह भरतश्रेष्ठो भीष्मस्तत्क्रियतां नृप ।
पुरा युद्धात्साधु मन्ये पाण्डवैस्सह सङ्गतम् ॥

Drona—

"King! let that be done which Bhishma, the greatest of the Bharatas, has spoken. Before war (breaks out), I consider alliance with the Pandavas as good.

'यद् वाक्यमर्जुनेनोक्तं करिष्यति च पाण्डवः ।
न ह्यस्य त्रिषु लोकेषु सदृशोऽस्ति धनुर्धरः ॥'

"What Arjuna said, he will do; for, there is no archer equal to him in the three worlds."

धृतराष्ट्रः—

'क्रोशतो मे न शृण्वन्ति बालाः पण्डितमानिनः ।
युद्धे विनाशः कृत्स्नस्य वयं शान्त्यै यतामहे ॥'

Dhritarashtra—

"These boys who think themselves to be wise do not hear me, though I cry hoarse. Wholesale is the ruin in battle; we will strive for peace."

दुर्योधनः—

'न भेतव्यं महाराज न शोच्या भवता वयम् ।
समर्थास्स्म पराञ्जेतुं बलिनस्समरे विभो ॥

Duryodhana—

"Great king, you need not be afraid; you need not pity us; king! powerful that we are, we are capable of conquering our foes in battle.

'युधिष्ठिरः पुरं हित्वा पञ्च ग्रामान्स याचते ।
भीतो हि मामकात्सैन्यात् प्रभावाच्चैव मे विभो॥

"King, leaving off his capital city, that Yudhisthira now begs for five villages; for he is afraid of my army and my power.

'अक्षौहिण्यो हि मे राजन् दशैका च समाहृताः।
न्यूना परेषां सप्तैव कस्मान्मे स्यात्पराजयः ॥

"King! eleven Akshauhinis have been collected for me; less than this, only seven are the enemies' Akshauhinis; how can there be defeat for me?

'एतत्सर्वं समाज्ञाय न मोहं गन्तुमर्हसि ॥

"Knowing all this, you ought not to be under delusion."

धृतराष्ट्रः—

'दुर्योधन निवर्तस्व युद्धाद् भरतसत्तम ।
अलमर्धं पृथिव्यास्ते सहामात्यस्य जीवितुम् ॥'

Dhritarashtra—

"Duryodhana, the best of the Bharatas! refrain from war; half of the kingdom is enough for you to live together with your ministers."

दुर्योधनः—

'यावद्धि सूच्यास्तीक्ष्णाया विद्धयेदग्रेण मारिष ।
तावदप्यपरित्याज्यं भूमेर्नः पाण्डवान्प्रति ॥'

Duryodhana—

"Respected king! not even so much of our land as is pierced by the tip of a sharp needle shall be given to the Pandavas."

दुर्योधने धार्तराष्ट्रे तद्वचो नाभिनन्दति ।
तूष्णींभूतेषु सर्वेषु समुत्तस्थुर्नरर्षभाः ॥

When Duryodhana, son of Dhritarashtra, did not approve of Dhritarashtra's words and when everybody was mute, the great men (assembled there) rose up.

सञ्जये प्रतियाते तु धर्मराजो युधिष्ठिरः ।
अब्रवीत्परवीरघ्नं दाशार्हं पाण्डुनन्दनः ॥

And when Sanjaya went back, Yudhisthira told Krishna, the slayer of enemy warriors:

'अयं स कालस्संप्राप्तो मित्राणां मित्रवत्सल ।
न च त्वदन्यं पश्यामि यो न आपत्सु तारयेत् ॥

"O! lover of friends! the time for our friends (to help us) has come. And besides you, I do not see any other person who will save us in our calamities.

'श्रुतं ते धृतराष्ट्रस्य सपुत्रस्य चिकीर्षितम् ।
अप्रदानेन राज्यस्य शान्तिमस्मासु मार्गति ॥

"You heard what Dhritarashtra, along with his sons, wants to do? He seeks for peace from us without giving the kingdom.

'इतो दुःखतरं किन्नु पञ्च ग्रामा वृता मया ।
न च तानपि दुष्टात्मा धार्तराष्ट्रोऽनुमन्यते ॥

"What is more miserable than this? Five villages were asked by me and even these the wicked son of Dhritarashtra does not consent to give!

'ईदृशेऽत्यर्थकृच्छ्रेऽस्मिन् कमन्यं मधुसूदन ।
उपसंप्रष्टुमर्हामि त्वामृते पुरुषोत्तम ॥'

"In such a great difficulty as this, Krishna, you best of men, which other person shall I consult except you?"

कृष्णः—

'उभयोरेव वामर्थे यास्यामि कुरुसंसदम् ।
शमं तत्र लभेयं चेद्युष्मदर्थमहापयन् ।
मोचयेयं मृत्युपाशात् सर्वां च पृथिवीमिमाम् ॥'

Krishna—

"In the interest of both of you I will go to the Kuru court; if, without letting down your interest, I secure peace there, I will free this whole universe from the noose of death."

युधिष्ठिरः—

'न ममैतन्मतं कृष्ण यत्त्वं यायाः कुरून्प्रति ।
सुयोधनस्सूक्तमपि न करिष्यति ते वचः ॥

Yudhisthira—

"Krishna, it is not my idea that you should go to the Kauravas; even if your words be good, Duryodhana will not act up to them.

'तेषां मध्यावतरणं तव कृष्ण न रोचये।
न हि नः प्रीणयेद् द्रव्यं तव द्रोहेण माधव॥'

"Krishna, I do not like your getting into their midst. The wealth that involves harm to you, will not please us."

कृष्णः—

'जानाम्येतां महाराज धार्तराष्ट्रस्य पापताम्।
अवाच्यास्तु भविष्यामः सर्वलोके महीक्षिताम्॥
अथ चेत्ते प्रवर्तेरन् मयि किञ्चिदसांप्रतम्।
निर्दहेयं कुरून्सर्वान् इति मे धीयते मतिः॥

Krishna—

"King, I know this wickedness of Duryodhana. But we will become blameless in the whole world and in the eyes of kings. If the Kauravas should do me anything improper, I will burn them all; so do I resolve.

'न जातु गमनं पार्थ भवेत्तत्र निरर्थकम् ।
अर्थप्राप्तिः कदाचित्स्यादन्ततो वाऽप्यवाच्यता॥'

"Yudhisthira, never will my going there become futile; perhaps, there will be success to our mission; at any rate, we shall become blameless."

युधिष्ठिरः—

'यत्तुभ्यं रोचते कृष्ण स्वस्ति प्राप्नुहि कौरवान् ।
कृतार्थं स्वस्तिमन्तं त्वां द्रक्ष्यामि पुनरागतम् ॥

Yudhisthira—

"As you please, Krishna; farewell; go to the Kauravas; I will see you return, successful and hale.

'अस्मान्वेत्थ परान्वेत्थ वेत्थार्थान्वेत्थ भाषितुम् ।
यद्यदस्मद्धितं कृष्ण तत्तद्वाच्यस्सुयोधनः ॥'

"You know us, you know our foes; you know things; you know (how) to speak; Krishna, whatever is for our good, that, you must tell Duryodhana."

कृष्णः—

'सर्वं जानाम्यभिप्रायं तेषां च भवतश्च यः।
तव धर्माश्रिता बुद्धिः तेषां वैराश्रिता मतिः॥

Krishna—

"I know all their views and yours also; your mind is after Dharma; theirs has taken to enmity.

'यदयुद्धेन लभ्येत तत्ते बहुमतं भवेत्॥

"That which can be got without war will be considered great by you.

'सर्वथा युद्धमेवाहमाशंसामि परैस्सह।
निमित्तानि हि सर्वाणि तथा प्रादुर्भवन्ति मे॥'

"After all, I fear there will be only war with our foes; for, such are all the omens that appear to me."

आरुरोह रथं शौरिरुपायात्कुरुसंसदम्॥

Krishna mounted a chariot and proceeded to the Kuru court.

धार्तराष्ट्रास्तमायान्तं प्रत्युज्जग्मुस्स्वलङ्कृताः।
दुर्योधनादृते सर्वे भीष्मद्रोणकृपादयः॥

Bhishma, Drona, Kripa and others,—everybody on Dhritarashtra's side, except Duryodhana, dressing themselves well, went to receive Krishna who was coming.

ततो राजानमासाद्य धृतराष्ट्रं यशस्विनम् ।
सभीष्मं पूजयामास वार्ष्णेयो वाग्भिरञ्जसा ॥

Meeting then the renowned king Dhritarashtra, Krishna honoured him and Bhishma with words of respect, without loss of time.

अथोपगम्य विदुरमपराह्णे जनार्दनः ।
पितृष्वसारं स पृथामभ्यगच्छदरिन्दमः ॥

Meeting Vidura then in the afternoon Krishna, the subduer of enemies, went to his aunt, Kunti.

सा दृष्ट्वा कृष्णमायान्तं प्रसन्नादित्यवर्चसम् ।
कण्ठे गृहीत्वा प्राक्रोशत् स्मरन्ती तनयान्पृथा ॥

On seeing Krishna, lustrous like the clear sun, coming, Kunti thought of her sons, embraced him and cried.

तत आश्वासयामास पुत्राधिभिरभिप्लुताम् ।
पृथामामन्त्र्य गोविन्दः कृत्वा चाभिप्रदक्षिणम् ।
दुर्योधनगृहं शौरिरभ्यगच्छदरिन्दमः ॥

Krishna then consoled Kunti, who was overwhelmed with the agonies suffered by her sons; taking leave of her, and going round her, Krishna, the subduer of enemies, went to Duryodhana's abode.

अभ्यागच्छति दाशार्हे धार्तराष्ट्रो महायशाः ।
उदतिष्ठत्सहामात्यः पूजयन्मधुसूदनम् ॥

As Krishna was coming, the renowned Duryodhana rose up along with his ministers, and offered him worship.

न्यमन्त्रयद्भोजनेन नाभ्यनन्दच्च केशवः ॥

He invited Krishna to dinner and Krishna did not comply.

कृष्णः—

'संप्रीतिभोज्यान्यन्नानि आपद्भोज्यानि वा पुनः ।
न च संप्रीयसे राजन् न चैवापद्गता वयम् ॥

Krishna—

"Food is taken at another's house out of love or in times of distress. Neither do you love (us), king, nor are we in any distress.

'द्विषदन्नं न भोक्तव्यं द्विषन्तं नैव भोजयेत् ।
पाण्डवान् द्विषसे राजन् मम प्राणा हि पाण्डवाः॥

"An enemy's food should not be eaten; nor should an enemy be fed. King, you hate the Pandavas and the Pandavas are my life-breath.

'यस्तान्द्वेष्टि स मां द्वेष्टि यस्ताननु स मामनु ।
ऐकात्म्यं मां गतं विद्धि पाण्डवैर्धर्मचारिभिः ॥

"He who hates them, hates me; he who is with them, is with me. Know me as having become identical with the righteous Pandavas.

'सर्वमेतदभोक्तव्यमन्नं दुष्टाभिसंहितम् ।
क्षत्तुरेकस्य भोक्तव्यमिति मे धीयते मतिः ॥'

"All this ill-meant food should not be eaten; Vidura's food alone should be eaten; so have I made up my mind."

एवमुक्त्वा महाबाहुर्दुर्योधनममर्षणम् ।
निवेशाय ययौ वेश्म विदुरस्य महात्मनः ॥

Having said so to the bad-tempered Duryodhana, the mighty Krishna went to the lofty-minded Vidura's house to stay there.

ततोऽनुयायिभिस्सार्धं मरुद्भिरिव वासवः ।
विदुरान्नानि बुभुजे शुचीनि गुणवन्ति च ॥

Along with his followers then, as Indra with the Maruts, Krishna ate the pure and excellent food of Vidura.

तं भुक्तवन्तमाश्वस्तं निशायां विदुरोऽब्रवीत् ।
'नेदं सम्यग्व्यवसितं केशवागमनं तव ॥

Vidura told him after he had eaten and taken rest in the night: "Krishna, this coming of yours is not a good resolve.

'यत्र सूक्तं दुरुक्तं च समं स्यान्मधुसूदन ।
न तत्र प्रलपेत्प्राज्ञो बधिरेष्विव गायनः ॥'

"Krishna, where both good words and bad words will be the same, there, as a musician before the deaf, a wise man should not open his mouth."

कृष्णः—

'हिते प्रयतमानं मां शङ्केद्दुर्योधनो यदि।
हृदयस्य च मे प्रीतिर्गच्छेयं नृष्ववाच्यताम्॥

Krishna—

"If Duryodhana should misunderstand me who am striving for good, there will only be satisfaction to my heart; I will become blameless in the eyes of the public.

'मम धर्मार्थयुक्तं हि श्रुत्वा वाक्यमनामयम्।
न चेदादास्यते बालो दिष्टस्य वशमेष्यति॥'

"If, hearing my wholesome words having Dharma as well as material good in them, the boyish Duryodhana will not accept (them), he will fall a prey to Fate."

तथा कथयतोरेव सा व्यतीयाय शर्वरी।
ततश्चादित्यमुद्यन्तमुपातिष्ठत माधवः।
महेन्द्रसदनप्रख्यां प्रविवेश सभां ततः॥

Even as they were talking in this manner, the night passed away. And then Krishna worshipped the rising sun and entered the court hall, resembling the abode of the great Indra.

अभ्यागच्छति दाशार्हे प्रज्ञाचक्षुः [नरेश्वर] ।
सहैव द्रोणभीष्माभ्यामुदतिष्ठन्महायशाः ।
तानि राजसहस्राणि समुत्तस्थुस्समन्ततः ॥

When Krishna was coming, the blind Dhritarashtra of great renown, rose up along with Drona and Bhishma; all around, those thousands of kings (present there), arose also.

निषसादासने कृष्णो राजानश्च यथासनम् ।
अविदूरे तु कृष्णस्य कर्णदुर्योधनावुभौ ।
एकासने महात्मानौ निषीदतुरमर्षणौ ॥

Krishna took his seat and the kings sat in their respective seats; and not far away from Krishna, those two great men, the impatient Karna and Duryodhana, sat on one seat.

संस्पृशन्नासनं शौरेर्महामतिरुपाविशत् ॥

Touching the seat of Krishna, the wise Vidura sat down.

ततस्तूष्णीं सर्वमासीद्गोविन्दगतमानसम् ॥

All was silent then, all minds being on Krishna.

तेष्वासीनेषु सर्वेषु सर्वां संश्रावयन्सभाम् ।
धृतराष्ट्रमभिप्रेक्ष्य समभाषत माधवः ॥

When all of them had sat down, Krishna spoke, facing Dhritarashtra and making the whole hall hear him:

'कुरूणां पाण्डवानां च शमस्स्यादिति भारत ।
अप्रणाशेन वीराणामेतद्याचितुमागतः ॥

"Scion of Bharata! I have come here to beg this that, without the ruin of warriors, there may be an amicable settlement between the Kauravas and the Pandavas.

'ते पुत्रास्तव [कौरव्य] दुर्योधनपुरोगमाः ।
धर्मार्थौ पृष्ठतः कृत्वा प्रचरन्ति नृशंसवत् ॥

"Those sons of yours, with Duryodhara at their head, are behaving like wicked men, discarding Right and material good.

'सेयमापन्महाघोरा कुरुष्वेव समुत्थिता ।
उपेक्ष्यमाणा [कौरव्य] पृथिवीं घातयिष्यति ॥

"For the Kauravas it is that this very dreadful calamity has come up, which, if overlooked, will annihilate the world.

'शक्या चेयं शमयितुं त्वं चेदिच्छसि [भारत]।
न दुष्करो ह्यत्र शमो मतो मे [भरतर्षभ]॥

"If you wish, this calamity can be put down; I think peace is not impossible in this affair.

'त्वय्यधीनश्शमो राजन् मयि चैव [विशांपते]।
पुत्रान्स्थापय [कौरव्य] स्थापयिष्याम्यहं परान्॥

"King, peace is dependent on you, as well as on me; pacify your sons; I will pacify the other party.

'पित्र्यं तेभ्यः प्रदायांशं पाण्डवेभ्यो यथोचितम्।
ततस्सपुत्रस्सिद्धार्थो भुङ्क्ष्व भोगान् [परन्तप]॥

"After giving to the Pandavas their due páternal share, you enjoy along with your sons your pleasures, with your objects achieved.

'अहं तु तव तेषां च श्रेय इच्छामि भारत।
लोभेऽतिप्रसृतान्पुत्रान् निगृह्णीष्व [विशांपते]॥'

"And I wish for your welfare as well as that of the Pandavas; check your sons that have gone headlong in avarice.

'स्थिताश्शुश्रूषितुं पार्थाः स्थिता योद्धुमरिन्दमाः।
यत्ते पथ्यतमं राजंस्तस्मिंस्तिष्ठ [परन्तप] ॥'

"The Pandavas who can quell their enemies, are ready to serve as well as to fight. King, stand by that which is most wholesome for you."

तद्वाक्यं पार्थिवास्सर्वे हृदयैस्तमपूजयन्।
न तत्र कश्चिद्वक्तुं हि वाचं प्राक्रामदग्रतः॥

Those words, all the kings honoured in their hearts; but none there came forward to speak.

धृतराष्ट्रः—

'स्वर्ग्यं लोक्यं च मामात्थ धर्म्यं न्याय्यं च केशव।
न त्वहं स्ववशस्तात क्रियमाणं न मे प्रियम्॥

Dhritarashtra—

"My dear Krishna, you tell me what is good for the other world as well as

this world, what is right and proper. But I am not mine own master. What is being done is not to my liking.

'अङ्ग दुर्योधनं कृष्ण मन्दं शास्त्रातिगं मम ।
अनुनेतुं महाबाहो यतस्व पुरुषोत्तम ॥

"O mighty Krishna, you best of men, try to conciliate my stupid and lawless son, Duryodhana.

'अनुशाधि दुरात्मानं स्वयं दुर्योधनं नृपम् ।
सुहृत्कार्यं तु सुमहत् कृतं ते स्याज्जनार्दन ॥'

"Krishna, you yourself advise this evil king Duryodhana; you would have done a very great work for a friend."

ततोऽभ्यावृत्य वार्ष्णेयो दुर्योधनममर्षणम् ।
अब्रवीन्मधुरां वाचं सर्वधर्मार्थतत्त्ववित् ॥

Turning round, Krishna, who knows the truth of all principles of Dharma and Artha, spoke then these sweet words to the impatient Duryodhana:

'दुर्योधन निबोधेदं मद्वाक्यं कुरुसत्तम ।
शमार्थं ते विशेषेण सानुबन्धस्य [भारत] ॥

"Duryodhana, listen to these words of mine, uttered especially for the sake of peace to you and your followers.

'रोचते ते पितुस्तात पाण्डवैस्सह संगमः ।
सामात्यस्य [कुरुश्रेष्ठ] तत्तुभ्यं तात रोचताम् ॥

"My dear Duryodhana, alliance with the Pandavas is liked by your father. May you also, with your ministers, like it.

'त्वामेव स्थापयिष्यन्ति यौवराज्ये महारथाः ।
महाराज्येऽपि पितरं धृतराष्ट्रं जनेश्वरम् ॥

"Those great warriors (the Pandavas) will install you yourself as crown-prince and your father, king Dhritarashtra, as the sovereign over all.

'मा तात श्रियमायान्तीमवमंस्थास्समुद्यताम् ।
अर्धं प्रदाय पार्थेभ्यो महतीं श्रियमाप्नुहि ॥

"Dear Duryodhana, do not spurn the great fortune which courts you; giving half to the Pandavas, attain to a great fortune.

'पाण्डवैस्संशमं कृत्वा चिरं भद्राण्यवाप्स्यसि ॥

"Making lasting peace with the Pandavas, you will fare well for long."

ततश्शान्तनवो भीष्मः प्रोवाच [भरतर्षभ] ।
'कृष्णेन वाक्यमुक्तोऽसि सुहृदां शममिच्छता ॥

Bhishma then spoke: "(Duryodhana!) Krishna, who wishes peace to his friends, has spoken to you.

'अकृत्वा वचनं तात न कल्याणमवाप्स्यसि ।
मातरं पितरं चैव मा मज्जीश्शोकसागरे ॥'

"My dear son, if you fail to act according to Krishna's words, you will have no welfare. Do not immerse your mother and father in the ocean of sorrow."

अथ द्रोणोऽब्रवीत्तत्र दुर्योधनमिदं वचः ।
एतच्चैव मतं सत्यं सुहृदोः कृष्णभीष्मयोः ।
यदि नादास्यसे तात पश्चात्तप्स्यसि [भारत] ॥'

Then Drona said in that assembly these words to Duryodhana: "Dear Duryodhana if you do not abide by this truthful view of your friends, Krishna and Bhishma, you will repent afterwards."

तस्मिन्वाक्यान्तरे वाक्यं क्षत्ताऽपि विदुरोऽब्रवीत्।
'दुर्योधन न शोचामि त्वामहं [भरतर्षभ]।
इमौ तु वृद्धौ शोचामि गान्धारीं पितरं च ते ॥

At the end of this speech, Vidura also said: "Duryodhana, I do not grieve for you; but I grieve for these two old persons, Gandhari and your father.

भिक्षुकौ विचरिष्येते शोचन्तौ पृथिवीमिमाम्।
कुलघ्नमीदृशं पापं जनयित्वा कुपूरुषम् ॥'

"Having begot such a sinful and bad person who destroys his own family, those two will wander in this world in sorrow as mendicants."

अथ दुर्योधनं राजा धृतराष्ट्रोऽभ्यभाषत।
'शमं चेद्याचमानं त्वं प्रत्याख्यास्यसि केशवम्।
त्वदर्थमभिजल्पन्तं न तवास्त्यपराभवः ॥'

Then, king Dhritarshtra addressed Duryodhana: "If you repudiate Krishna who begs for peace and speaks for your good, defeat is certain for you."

श्रुत्वा दुर्योधनो वाक्यमप्रियं कुरुसंसदि ।
प्रत्युवाच महाबाहुं वासुदेवं यशस्विनम् ॥

Hearing these disagreeable words in the assembly of the Kauravas, Duryodhana replied to the mighty and renowned Krishna:

'भक्तिवादेन पार्थानामकस्मान्मधुसूदन ।
भवान्क्षत्ता च राजा वाऽप्याचार्यो वा पितामहः ।
मामेव परिगर्हन्ते नान्यं कञ्चन पाण्डवम् ॥

"Krishna, partial towards the Pandavas and without any reason, you, Vidura, the king, our teacher Drona and our grandfather Bhishma reproach only me and not any of the Pandavas.

'न चाहं लक्षये कञ्चिद्व्यभिचारमिहात्मनः ॥

"And I do not see here any transgression on my part.

'न हि भीष्मकृपद्रोणास्सकर्णा मधुसूदन ।
देवैरपि युधा जेतुं शक्याः किमुत पाण्डवैः ॥

"Bhishma, Kripa, Drona and Karna cannot, O! Krishna, be won in battle even by the gods; why mention the Pandavas?

'ते वयं वीरशयनं प्राप्स्यामो यदि संयुगे।
अप्रणम्यैव शत्रूणां न नस्तप्स्यन्ति माधव॥

"If, without bowing to our enemies, we die a warrior's death on the battle-field none will feel sorry for us, Krishna.

'राज्यांशश्चाभ्यनुज्ञातो यो मे पित्रा पुराऽभवत्।
न स लभ्यः पुनर्जातु मयि जीवति केशव॥

"And that share of the kingdom which was previously granted (to the Pandavas) by my father, that can never be had again so long as I am alive.

'यावद्धि तीक्ष्णया सूच्या विद्धयेदग्रेण केशव।
तावदप्यपरित्याज्यं भूमेर्नः पाण्डवान्प्रति॥'

"Krishna, that much of our land even as is pierced by the tip of a sharp needle, cannot be parted with to the Pandavas."

ततः प्रहस्य दाशार्हः क्रोधपर्याकुलेक्षणः।
दुर्योधनमिदं वाक्यमब्रवीत् कुरुसंसदि॥

Laughing and with eyes perturbed with anger, Krishna then said these words to Duryodhana in the Kuru assembly:

'लप्स्यसे वीरशयनं काममेतदवाप्स्यसि ।
स्थिरो भव सहामात्यो विमर्दो भविता महान् ॥

"You shall get the hero's death; this desire of yours, you shall realise; be steadfast, along with your counsellors; there shall be a great conflict.

'यच्चैभ्यो याचमानेभ्यः पित्र्यमंशं न दित्ससि ।
तच्च पाप प्रदाताऽसि भ्रष्टैश्वर्यो निपातितः ॥'

"That which you do not like to give to these Pandavas who beg for their paternal share, you, sinner, shall give, fallen and bereft of your power."

एवं ब्रुवति दाशार्हे धार्तराष्ट्रस्सुयोधनः ।
क्रुद्धः प्रातिष्ठतोत्थाय महानाग इव श्वसन् ॥

When Krishna was speaking thus, Duryodhana, the son of Dhritarashtra, rose up in anger and, sighing like a huge serpent, departed.

तं प्रस्थितमभिप्रेक्ष्य दाशार्हः पुष्करेक्षणः ।
भीष्मद्रोणमुखान्सर्वानभ्यभाषत वीर्यवान् ॥

Seeing him gone away, the heroic, lotus-eyed Krishna addressed Bhishma, Drona and all others:

'सर्वेषां कुरुवृद्धानां महानयमतिक्रमः ।
प्रसह्य मन्दमैश्वर्ये न नियच्छन्ति यन्नृपम् ॥

"This is a grave neglect of duty in all the Kuru elders that they do not, by force, curb the foolish king, Duryodhana, to behave properly in his royal office.

'राजन्दुर्योधनं बद्ध्वा ततः संशाम्य पाण्डवैः ।
त्वत्कृते न विनश्येयुः क्षत्रियाः क्षत्रियर्षभ ॥'

"King, restraining Duryodhana, come to peace with the Pandavas; let not kings perish on your account."

कृष्णस्य तु वचश्श्रुत्वा धृतराष्ट्रो जनेश्वरः ।
विदुरं सर्वधर्मज्ञं त्वरमाणोऽभ्यभाषत ॥

Hearing Krishna's words, king Dhritarashtra hastened and addressed Vidura who knew all Dharmas:

'गच्छ तात महाप्राज्ञ गान्धारीं दीर्घदर्शिनीम् ।
आनयेह तया सार्धमनुनेष्यामि दुर्मतिम् ॥

"Dear and very intelligent Vidura, go and fetch the far-sighted Gandhari here; along with her, I will supplicate that fool."

राज्ञस्तु वचनं श्रुत्वा विदुरो दीर्घदर्शिनीम् ।
आनयामास गान्धारीं धृतराष्ट्रस्य शासनात् ॥

Hearing the words of the king, Vidura brought the far-sighted Gandhari, on the command of Dhritarashtra.

धृतराष्ट्रः—

'एष गान्धारि पुत्रस्ते दुरात्मा शासनातिगः ।
सभाया निर्गतो मूढो व्यतिक्रम्य सुहृद्वचः ॥'

Dhritarashtra—

"Gandhari, this evil son of yours, transgressor of (all) laws, has walked out of the hall, overriding friends' words."

गान्धारी—

'आनायय सुतं क्षिप्रं राज्यकामुकमातुरम् ॥

Gandhari—

"Quickly, fetch my son who is feverishly coveteous of the kingdom."

शासनाद्धृतराष्ट्रस्य दुर्योधनममर्षणम् ।
मातुश्च वचनात्क्षत्ता सभां प्रावेशयत्पुनः ॥

On the command of Dhritarashtra and on his mother's words, Vidura made the bad-tempered Duryodhana enter the hall again.

तं प्रविष्टमभिप्रेक्ष्य पुत्रमुत्पथमास्थितम् ।
विगर्हमाणा गान्धारी शमार्थं वाक्यमब्रवीत् ॥

Seeing that erring son enter the hall, Gandhari censured him and said for the sake of peace:

'दुर्योधन यदाह त्वां पिता [भरतसत्तम] ।
भीष्मो द्रोणः कृपः क्षत्ता सुहृदां कुरु तद्वचः ॥

"Duryodhana! What your father, Bhishma, Drona, Kripa and Vidura told you, act up to those words of your friends.

'प्रपद्यस्व महाबाहुं कृष्णमक्लिष्टकारिणम् ।
प्रसन्नो हि सुखाय स्यादुभयोरेव केशवः ॥

"Seek the mighty Krishna, unharmful in his acts. If he is gracious, Krishna will be for the happiness of both (yourself and the Pandavas).

'प्रयच्छ पाण्डुपुत्राणां यथोचितम् [अरिन्दम] ।
यदीच्छसि सहामात्यो भोक्तुमर्धं प्रदीयताम् ॥'

"Give to the Pandavas what is proper; if you want to be happy with your counsellors, let half (of the kingdom) be given to the Pandavas."

तत्तु वाक्यमनादृत्य सोऽर्थवन्मातृभाषितम् ।
पुनः प्रतस्थे संरम्भात् सकाशमकृतात्मनाम् ॥

Disregarding those sensible words spoken by his mother, he again went away in a flurry to where those self-willed (friends of his) were.

एकान्तमुपसृत्येह मन्त्रं पुनरमन्त्रयत् ।
'वयमेव हृषीकेशं निगृह्णीम बलादिव'॥

Moving to a secluded place, Duryodhana took counsel: "We ourselves shall forcibly seize Krishna."

तेषां पापमभिप्रायं विदुरो दीर्घदर्शिवान्।
धृतराष्ट्रं महाबाहुमब्रवीत्कुरुसंसदि ॥

The far-sighted Vidura informed the powerful Dhritarashtra in the Kuru assembly of their evil design.

ततो दुर्योधनं क्षत्ता पुनः प्रावेशयत्सभाम् ॥

Then, Vidura made Duryodhana enter the hall again.

अथ दुर्योधनं राजा धृतराष्ट्रोऽभ्यभाषत ॥

King Dhritarashtra then addressed Duryodhana:

'त्वमिमं पुण्डरीकाक्षमप्रधृष्यं दुरासदम्।
पापैस्सहायैस्संहत्य निग्रहीतुं किलेच्छसि ॥'

"This unassailable, unapproachable Krishna, you, I, hear, want to seize, uniting with evil allies."

इत्युक्ते धृतराष्ट्रेण केशवश्शत्रुपूगहा।
दुर्योधनं धार्तराष्ट्रमभ्यभाषत वीर्यवान् ॥

When Dhritarashtra said this, the valorous Krishna, the destroyer of enemy armies, told Duryodhana, the son of Dhritarashtra:

'एकोऽहमिति यन्मोहान्मन्यसे मां सुयोधन ।
परिभूय सुदुर्बुद्धे ग्रहीतुं मां चिकीर्षसि ॥

"Extremely stupid Duryodhana! you want to overpower me and do things to catch me, taking me, in your ignorance, to be single.

इहैव पाण्डवास्सर्वे तथैवान्धकवृष्णयः ।
इहादित्याश्च रुद्राश्च वसवश्च महर्षिभिः ॥'

"Here itself, in me, are all the Pandavas, all the Andhakas and the Vrishnis, Devas, Rudras, Vasus and all the great sages."

एवमुक्त्वा जहासोच्चैः केशवः परवीरहा ।
तस्य संस्मयतश्शौरेः विद्युद्रूपा महात्मनः ।
युगपच्च विनिष्पेतुस्साक्षात्सर्वास्तु देवताः ॥

Having said so, Krishna, the destroyer of enemy-warriors, laughed aloud; and of that great Krishna who was laughing, came out simultaneously, like flashes of lightning, all the gods in person.

तं दृष्ट्वा घोरमात्मानं केशवस्य महात्मनः ।
न्यमीलयन्त नेत्राणि राजानस्त्रस्तचेतसः ॥

Seeing that terrible form of the great Krishna, the frightened kings closed their eyes.

प्रादात्तेषां स भगवान् दिव्यं चक्षुर्जनार्दनः ।
प्रणम्य शिरसा देवं तुष्टुवुः प्राञ्जलिस्थिताः ॥

Lord Krishna gave them the divine eye; bowing with their head, they stood with folded arms and extolled the Lord.

ततस्स पुरुषव्याघ्रस्सञ्जहार वपुस्स्वकम् ।
धृतराष्ट्रो महाराजः पुनरेवाभ्यभाषत ॥

Then the greatest of men, Krishna, withdrew his form. King Dhritarashtra again spoke:

'यावद्बलं मे पुत्रेषु पश्यतस्ते जनार्दन ।
प्रत्यक्षं ते न ते किञ्चित्परोक्षं शत्रुकर्शन ।
विदित्वैतामवस्थां मे नातिशङ्कितुमर्हसि ॥'

"Krishna, tormentor of your enemies, what influence I have over my sons, must have become clear to you who have been seeing (all this); there is nothing unknown to you. Knowing this plight of mine, you must not suspect me very much."

ततोऽब्रवीन्महाबाहुर्धृतराष्ट्रं जनार्दनः ।
द्रोणं पितामहं भीष्मं क्षत्तारं बाह्लिकं कृपम् ॥

Then the mighty Krishna told Dhritarashtra, Drona, grandfather Bhishma, Vidura, Bahlika and Kripa:

'प्रत्यक्षमेतद् भवतां यद् वृत्तं कुरुसंसदि ।
यथा चाशिष्टवन्मन्दो रोषादद्य समुत्थितः ।
वदत्यनीशमात्मानं धृतराष्ट्रो महीपतिः ।
आपृच्छे भवतस्सर्वान् गमिष्यामि युधिष्ठिरम्॥'

"What happened in the Kuru assembly happened before your eyes. As Duryodhana, the fool, rose up (and went away) now in anger, like an ill-bred fellow and as Dhritarashtra, the king, describes himself as powerless, I take leave of you all and go to Yudhisthira."

कुरूणां पश्यतां द्रष्टुं स्वसारं स पितुर्ययौ ॥

As the Kauravas were looking on, Krishna went to his aunt, Kunti.

प्रविश्याथ गृहं तस्याश्चरणावभिवाद्य च ।
आचख्यौ तत्समासेन यद् वृत्तं कुरुसंसदि ॥

Entering her house, and bowing at her feet, he briefly told her what happened in the Kuru assembly.

'उक्तं बहुविधं वाक्यं न चासौ तद् गृहीतवान् ।
आपृच्छे भवतीं शीघ्रं प्रयास्ये पाण्डवान्प्रति ।
किं वाच्याः पाण्डवेयास्ते भवत्या वचनान्मया ॥'

"Duryodhana was advised in various ways but he did not accept those words. I take leave of you and shall go to the Pandavas quickly. What shall I tell the Pandavas as your message?"

कुन्ती—

'ब्रूयाः केशव राजानं धर्मात्मानं युधिष्ठिरम् ।
"परपिण्डमुदीक्षे वै त्वां सूत्वा मित्रनन्दन ।
युध्यस्व राजधर्मेण मा गमः पापिकां गतिम् ।
यदर्थं क्षत्रिया सूते तस्य कालोऽयमागतः ।"
अरिष्टं गच्छ पन्थानं पुत्रान्मे प्रतिपालय ॥'

Kunti—

"Krishna, tell the virtuous king Yudhisthira: 'Having borne you, the joy of your friends, I am looking up to others for my food, in accordance with royal duty, fight; incur not the fate of sin. The time for that for which a woman of royal blood gives birth to a son has come now.' (Krishna), go your safe way; protect my sons."

अभिवाद्याथ तां कृष्णः सिंहखेलगतिस्ततः ।
आरोप्याथ रथे कर्णं प्रायात्सात्यकिना सह ॥

Bowing to her then, Krishna of the lion's sportive gait, took Karna in his chariot and went along with Satyaki.

कृष्णः—

'मया सार्धमितो यातमद्य त्वां तात पाण्डवाः ।
अभिजानन्तु कौन्तेयं पूर्वजातं युधिष्ठिरात् ।
पादौ तव ग्रहीष्यन्ति भ्रातरः पञ्च पाण्डवाः ॥

Krishna—

"Dear Karna, let the Pandavas know you who are now going from here along with me, as a son of Kunti, born prior to Yudhisthira. "Your brothers, the five Pandavas, shall hold your feet in respect.

'अहं च त्वाऽभिषेक्ष्यामि राजानं पृथिवीपतिम् ।
प्रशाधि राज्यं कौन्तेय कुन्तीं च प्रतिनन्दय ॥'

"And I shall install you as king; son of Kunti! you rule the kingdom and delight Kunti also."

कर्णः—

'सर्वं चैवाभिजानामि यथा त्वं कृष्ण मन्यसे ।
कन्या गर्भं समाधत्त भास्करान्मां जनार्दन ।
कुन्त्या त्वहमपाकीर्णो यथा न कुशलं तथा ॥

Karna—

"I understand all that you think, Krishna. Kunti, as a maiden, bore me to the sun. However, in such a manner as there could be no welfare for me, I was abandoned by Kunti.

'सूतो हि मामधिरथो दृष्ट्वैवाभ्यानयद्गृहान् ।
मत्स्नेहाच्चैव राधायां सद्यः क्षीरमवातरत् ॥

"And it was the driver, Adhiratha, who, seeing me, took me to his house, and out of love for me, milk flowed immediately from Radha (his wife).

'पितरं चाभिजानामि तमहं सौहृदात्सदा ॥

"And I consider that Adhiratha as my father always, by reason of his affection.

'भार्याश्चोढास्तासु पुत्राः पौत्रा जाता जनार्दन ।
तासु मे हृदयं कृष्ण सञ्जातं कामबन्धनम् ॥

"I have married wives and through them, sons and grandsons have been born and with them, Krishna, my heart is bound in ties of affection.

'न पृथिव्या सकलया न सुवर्णस्य राशिभिः ।
हर्षाद्भयाद्वा गोविन्द मिथ्या कर्तुं तदुत्सहे ॥

"Not for all this world, not for heaps of gold, not for pleasure or fear, would I bear proving faithless to these, Krishna.

'धृतराष्ट्रकुलं कृष्ण भुक्तं राज्यमकण्टकम् ।
मां च कृष्ण समासाद्य विग्रहश्चापि पाण्डवैः ॥

"Krishna, living in Dhritarashtra's family, freely has the kingdom been enjoyed by me; and on my strength, quarrel with the Pandavas was picked up (by Duryodhana).

'अनृतं नोत्सहे कर्तुं धार्तराष्ट्रस्य धीमतः ॥

"I will not bear proving faithless to the intelligent Duryodhana.

'यदि ह्यद्य न गच्छेयं द्वैरथं सव्यसाचिना ।
अकीर्तिस्स्याद्धृषीकेश मम पार्थस्य चोभयोः ॥

"If I do not meet Arjuna in duel now, there will be infamy, Krishna, for both myself and Arjuna.

'यदि जानाति मां राजा धर्मात्मा संयतेन्द्रियः ।
कुन्त्याः प्रथमजं पुत्रं न स राज्यं ग्रहीष्यति ॥'

"If the righteous Yudhisthira of controlled senses knows me as the eldest son of Kunti, he will not take the kingdom.

'प्राप्य चापि महद्राज्यं तदहं [मधुसूदन] ।
स्फीतं दुर्योधनायैव संप्रदद्याम् [अरिन्दम] ॥

"And even after getting that vast and prosperous kingdom, I will give it only to Duryodhana.

'स एव राजा धर्मात्मा शाश्वतोऽस्तु युधिष्ठिरः।
नेता यस्य हृषीकेशो योद्धा यस्य धनञ्जयः॥

"May that righteous Yudhisthira himself be the permanent king, for whom Krishna is the leader and Arjuna, the fighter.

'तदत्र [पुण्डरीकाक्ष] विधत्स्व यदभीप्सितम्।
समुपानय कौन्तेयं युद्धाय मम [केशव]।
मन्त्रसंवरणं कुर्वन् नित्यमेव [परन्तप]॥'

"Therefore, do what you please. Keeping this consultation with me secret for ever, bring Arjuna to me for fight."

इत्युक्त्वा माधवं कर्णः परिष्वज्य च पीडितम्।
विसर्जितो निववृते, गङ्गातीरे यतव्रतः।
दृष्ट्वा कुन्तीमुपातिष्ठदभिवाद्य कृताञ्जलिः।
'राधेयोऽहमाधिरथिः ब्रूहि किं करवाणि ते'॥

Having said so, Karna, embraced Krishna closely and given leave, returned. Meeting Kunti on the banks of the Ganges, Karna who

swerved not from his vow, bowed to her and with folded hands stood ready to serve her, with the words: "I am Karna, son of Radha and Adhiratha; tell me, what shall I do for you?"

कुन्ती—

'कौन्तेयस्त्वं न राधेयो न तवाधिरथः पिता।
कानीनस्त्वं मया जातः पार्थस्त्वमसि पुत्रक॥

Kunti—

"You are the son of Kunti, not Radha; Adhiratha is not your father; you were borne by me when I was a maiden; my son, you are the son of Kunti.

'अद्य पश्यन्तु कुरवः कर्णार्जुनसमागमम्॥'

"Let the Kurus now witness the union of Karna and Arjuna."

कर्णः—

'न वै मम हितं पूर्वं मातृवच्चेष्टितं त्वया।
सा मां संबोधयस्यद्य केवलात्महितैषिणी॥

Karna—

"You have never acted before for my welfare like a mother, and you now inform me (of this), desiring only your own good.

'पाण्डवान् यदि गच्छामि किं मां क्षत्रं वदिष्यति॥

"If I go over to the Pandavas, what will the world of kings say?"

'उपनह्य परैर्वैरं ये मां नित्यमुपासते ।
नमस्कुर्वन्ति च कथं तेषां छिन्द्यां मनोरथम् ॥

"How can I frustrate the hopes of those who, developing enmity with their foes, adore me and pay respects to me constantly?

'धृतराष्ट्रस्य पुत्राणामर्थे योत्स्यामि ते सुतैः ।
बलं च शक्तिं चास्थाय न वै त्वय्यनृतं वदे ॥

"With my strength and power, I will fight your sons for the sons of Dhritarashtra; I am not speaking falsehood to you.

'न च तेऽयं समारम्भो मयि मोघो भविष्यति ।
संग्रामे न हनिष्यामि ते सुतानर्जुनादृते ॥

"And this effort of yours regarding me shall not be futile; barring Arjuna, I will not kill in battle your (other) sons.

'न ते जातु नशिष्यन्ति पुत्राः पञ्च यशस्विनि ।
निरर्जुनास्सकर्णा वा सार्जुना वा हते मयि ॥'

"Renowned woman, five of your sons will never perish; they will be either without Arjuna but with Karna or with Arjuna when I am killed."

अनामयं स्वस्ति चेति ततस्तौ जग्मतुः पृथक् ॥

Wishing welfare and bidding farewell, the two then parted.

आगम्य हास्तिनपुरादुपप्लाव्यमरिन्दमः ।
पाण्डवानां यथावृत्तं केशवस्सर्वमुक्तवान् ॥

Krishna, the subduer of his enemies, coming to Upaplavya from Hastinapura, told the Pandavas everything as it happened.

कृष्णः—

'तथ्यं पथ्यं हितं चोक्तो न च गृह्णाति दुर्मतिः ।
दण्डं चतुर्थं पश्यामि तेषु पापेषु नान्यथा ॥

Krishna—

"Duryodhana was told what was truthful, wholesome and beneficial; the fool does not take the words. I consider punishment by war, the fourth expedient, as proper for those sinners; by no other means (can they be tackled).

'निर्यताश्च विनाशाय कुरुक्षेत्रं नराधिपाः ॥'

"And kings have (already) started for the Kurukshetra for their own ruin.

जनार्दनवचश्श्रुत्वा धर्मराजो युधिष्ठिरः ।
भ्रातॄनुवाच धर्मात्मा समक्षं केशवस्य ह ।
'तस्मात्सेनाविभागं मे कुरुध्वं नरसत्तमाः' ॥

Hearing the words of Krishna, the righteous Yudhisthira told his brothers, in the presence of Krishna: "Therefore, you best of men, marshal my army."

तस्य तद्वचनं श्रुत्वा संप्राहृष्यन्नरोत्तमाः ।
तेऽवगाह्य कुरुक्षेत्रं शङ्खान्दध्मुररिन्दमाः ॥

Those best of men rejoiced on hearing those words of Yudhisthira. Those subduers of enemies entered Kurukshetra and blew their conches.

ततश्शान्तनवं भीष्मं प्राञ्जलिर्धृतराष्ट्रजः ।
सह सर्वैर्महीपालैरिदं वचनमब्रवीत् ।
'प्रयातु नो भवानग्रे देवानामिव पावकिः' ॥

Then, Duryodhana, standing in reverential attitude, spoke, along with all the kings, these words to Bhishma: "May you lead us, as god Skanda led the gods."

भीष्मः—

'यथैव हि भवन्तो मे तथैव मम पाण्डवाः ।
न त्वेवोत्सादनीया मे पाण्डोः पुत्रा जनाधिप ।
तस्माद् योधान्हनिष्यामि प्रयोगेणायुतं सदा ।
सेनापतिस्त्वहं राजन् समयेनापरेण ते ।
कर्णो वा युध्यतां पूर्वमहं वा पृथिवीपते ॥'

Bhishma—

"As you are to me, so are the Pandavas. The sons of Pandu ought not to be destroyed by me. Therefore, I shall kill a ten thousand warriors (on their side) by discharging my missiles every time I fight. King, I will be your generalissimo on one other condition: 'Let Karna fight first or myself.'"

कर्णः—

'नाहं जीवति गाङ्गेये राजन् योत्स्ये कथञ्चन ।
हते भीष्मे तु योत्स्यामि सह गाण्डीवधन्वना ॥'

Karna—

"King, as long as Bhishma is alive I will not fight in any manner; but when Bhishma is killed, I will fight the Gandhiva-bowed Arjuna."

ततः प्रभाते विमले धार्तराष्ट्रेण चोदिताः ।
दुर्योधनेन राजानः प्रययुः पाण्डवान्प्रति ॥

Then, in the clear morning, the kings urged by Duryodhana, son of Dhritarashtra, marched against the Pandavas.

तथैव राजा कौन्तेयो धर्मपुत्रो युधिष्ठिरः ।
धृष्टद्युम्नमुखान्वीरांश्चोदयामास [भारत] ॥

Similarly, king Yudhisthira, son of Kunti, directed the warriors led by Dhrishtad-yumna (to attack).

॥ इति उद्योगपर्व समाप्तम् ॥

THUS ENDS THE UDYOGA PARVA

॥ अथ भीष्मपर्व ॥

BHISHMA PARVA

ततस्ते समयं चक्रुः कुरुपाण्डवसोमकाः ।
धर्मान्संस्थापयामासुर्युद्धानां [भरतर्षभ] ॥

Then, those Kauravas, Pandavas and Somakas made an agreement and established rules for fighting.

'निवृत्ते विहिते युद्धे स्यात्प्रीतिर्नः परस्परम् ।
निष्क्रान्ताः पृतनामध्यान्न हन्तव्याः कदाचन ।
रथी च रथिना योध्यो गजेन गजधूर्गतः ।
अश्वेनाश्वी पदातिश्च पादातेनैव [भारत] ।
परेण सह संयुक्तः प्रमत्तो विमुखस्तथा ।
क्षीणशस्त्रो विवर्मा च न हन्तव्यः कदाचन ॥'

"When the battle is fought and finished, there shall be mutual friendship between us. Those who have gone out of the ranks shall never be killed. One mounted on a chariot shall be fought by one on a chariot, one on an elephant with an elephant, one on a horse with a horse, and a footsoldier only by a footsoldier. One engaged with another, one inattentive, or disinclined to fight or one who was turned away from the field, one who has lost his weapons and one without armour shall never be killed."

बृहतीं धार्तराष्ट्रस्य सेनां दृष्ट्वा समुद्यताम् ।
विषादमगमद्राजा विवर्णोऽर्जुनमब्रवीत् ॥

'Seeing 'the huge army of Duryodhana ready for the battle, king Yudhisthira became sad and with a pale face, said to Arjuna:

'धनञ्जय कथं शक्यमस्माभिर्योद्धुमाहवे ।
धार्तराष्ट्रैर्महाबाहो येषां योद्धा पितामहः ॥'

"Mighty Arjuna! how can we fight the warriors on Dhritarashtra's side for whom (our) grandfather, Bhishma, fights."

अर्जुनः—

'प्रज्ञयाऽभ्यधिकाञ्शूरान्गुणयुक्तान्बहूनपि ।
जयन्त्यल्पतरा येन तन्निबोध विशांपते ॥

Arjuna—

"King, hearken how the inferior conquer even those who are superior in knowledge, who are (greater) warriors, (more) endowed with qualities and (greater) in numbers.

'न तथा बलवीर्याभ्यां जयन्ति विजिगीषवः ।
यथा सत्यानृशंस्याभ्यां धर्मेणैवोद्यमेन च ॥

"Those who desire victory achieve it not so much by strength and valour as by their (qualities of) truthfulness, benevolence, and effort which is strictly righteous.

'त्यक्त्वाऽधर्मं तथा सर्वं धर्मं चोत्तममास्थिताः ।
युध्यध्वमनहङ्कारा यतो धर्मस्ततो जयः ॥

"Avoiding Adharma and basing yourselves on best Dharma, fight without egoism; where Dharma is, there victory is.

'एवं राजन्विजानीहि ध्रुवोऽस्माकं रणे जयः।
यथा तु नारदः प्राह यतः कृष्णस्ततो जयः।
गुणभूतो जयः कृष्णे पृष्ठतोऽभ्येति माधवम् ॥

"Know it, king, thus is victory certain for us in (this) battle; even as Narada said, where Krishna is, there victory is. Victory is an attribute of Krishna; it follows Him at His back.

ततो युधिष्ठिरो राजा स्वां सेनां समचोदयत्।
प्रतिव्यूहन्ननीकानि भीष्मस्य [भरतर्षभ] ॥

Then king Yudhisthira arrayed his army against Bhishma and directed it (to attack).

' मध्ये शिखण्डिनोऽनीकं रक्षितं सव्यसाचिना ॥

In the centre (of that army) were the forces of Sikhandi protected by Arjuna, the archer who shoots with either hand.

रथोऽर्जुनस्याग्निरिवार्चिमाली
विभ्राजते श्वेतहयस्सुचक्रः।
तमास्थितः केशवसंगृहीतं
कपिध्वजो गाण्डिवबाणपाणिः ॥

Arjuna's chariot with its white horses and firm wheels, shone like fire, emitting a corona of rays. On that chariot the reins of whose horses Krishna was holding, was the monkey-bannered Arjuna with the Gandiva bow and arrows in his hands.

अथापश्यत्स्थितान्पार्थः पितॄनथ पितामहान् ।
आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा ।
श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि ॥
तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान् ।
कृपया परयाऽऽविष्टो विषीदन्निदमब्रवीत् ॥

Then Arjuna saw there (on the battle-field) fathers, grandfathers, preceptors, uncles, brothers, sons, grand-sons, fathers-in-law and friends standing in both the armies. Seeing all those kinsmen standing (determined for fighting), Arjuna was overtaken by great compassion and he said (to Krishna, his charioteer) in sorrow: '

'दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ।
सीदन्ति मम गात्राणि मुखं च परिशुष्यति ।

गाण्डीवं स्रंसते हस्तात्त्वक् चैव परिदह्यते ।
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥

न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च ।
किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा ॥

स्वजनं हि कथं हत्वा सुखिनस्स्याम माधव ।
अहो बत महत्पापं कर्तुं व्यवसिता वयम् ।
यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ॥'

"Krishna! seeing these kinsmen of ours come with the desire to fight, my limbs fail, my mouth becomes parched, the Gandiva slips from my hand, my skin burns and I am not able to stand firm; my mind seems to whirl. Krishna! I do not wish for victory, or kingdom, or happiness; of what use is the kingdom to us, or pleasures or even life? How can we be happy, Krishna, after killing our own kinsmen? Alas! we have resolved to commit a great sin, we who are out to kill our own kinsmen through our avarice for the pleasures of a kingdom."

एवमुक्त्वा हृषीकेशं गुडाकेशः [परन्तप]।
न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह॥

Having said this to Krishna, Arjuna added "I will not fight," and kept quiet.

तमुवाच हृषीकेशः प्रहसन्निव [भारत]।
'धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते॥
अथ चेत्त्वमिमं धर्म्यं सङ्ग्रामं न करिष्यसि।
ततस्स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि।
भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः॥
हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्॥
सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि॥
कर्मण्येवाधिकारस्ते मा फलेषु कदाचन॥
न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।
न मे पार्थास्ति कर्तव्यं वर्त एव च कर्मणि॥
मयि सर्वाणि कर्माणि सन्न्यस्याध्यात्मचेतसा।
निराशीर्निर्ममो भूत्वा युद्ध्यस्व विगतज्वरः॥
श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्॥
अनाश्रितः कर्मफलं कार्यं कर्म करोति यः।
स सन्न्यासी च योगी च न निरग्निर्न चाक्रियः॥

ऋतेऽपि त्वां न भविष्यन्ति सर्वे
येऽवस्थिताः प्रत्यनीकेषु योधाः ।
मयैवैते निहताः पूर्वमेव
निमित्तमात्रं भव सव्यसाचिन् ॥

मच्चित्तस्सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि ॥

यद्यहंकारमाश्रित्य न योत्स्य इति मन्यसे ।
मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ।
कर्तुं नेच्छसि यन्मोहात् करिष्यस्यवशोऽपि तत् ।
ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ।
तमेव शरणं गच्छ सर्वभावेन भारत ॥

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥'

Krishna said to Arjuna, laughing a little: "To a Kshatriya, there is no other good than righteous warfare. In case you do not fight this righteous battle, you neglect your duty, throw away fame and incur sin. Warriors will think that you have desisted from the battle out of fear. If you are killed

you will attain to heaven or if you win, you will enjoy the world. Viewing alike happiness and misery, gain and loss, victory and defeat, you then get ready for the battle; doing thus, you will not incur sin. To work alone are you entitled, never to (its) fruits. Never does anybody stand even a moment without doing an act. There is nothing to be done for me and still I am active. Offering up all acts to me with a spiritual mind, without any wish and disinterested, fight without any mental fever. Though ill-performed, one's own duty is better than another's duty well-performed. He who does the act that ought to be done, without intent on the fruit of the action, is the man of renunciation and the Yogin; not he who has left off the worship of fire and not he who does not do anything.

"Even without you, all these warriors who stand in the opposite ranks, will cease to be; they have been already killed by myself; you archer who shoot with either arm! be simply the

apparent cause (of the destruction of these warriors).

"With your mind fixed on me, you will surmount all difficulties by my grace. If resorting to egoism, you think you will not fight, this resolve of yours is futile; Nature will impel you. What in delusion, you do not want to do, you will do even in spite of yourself. Arjuna, God is in the heart of all beings, making all beings whirl by his power as if on a whirling machine. Take refuge in Him completely. Discarding all Dharmas, seek me alone as refuge; I will free you from all sins; grieve not."

अर्जुनः—

'स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ॥'

Arjuna said to Krishna—

"I stand here with all my doubts cleared; I will do what you say."*

---

* For the full discourse of Lord Sri Krishna, see THE BHAGAVAD GITA with the Text in Devanagari and English Translation by Dr. Besant. Pocket Edition. As. 4. G. A. Natesan & Co., Madras.

ततो धनञ्जयं दृष्ट्वा बाणगाण्डीवधारिणम् ।
पुनरेव महानादं व्यसृजन्त महारथाः ॥

Then, seeing Arjuna taking up the arrows and his Gandiva bow, the warriors sent a peal again.

ततो युधिष्ठिरो दृष्ट्वा युद्धाय समवस्थिते ।
सेने विमुच्य कवचं निक्षिप्य च वरायुधम् ।
अवरुह्य रथात्क्षिप्रं पद्भ्यामेव कृताञ्जलिः ।
भीष्ममेवाभ्ययात्तूर्णं भ्रातृभिः परिवारितः ॥

Seeing then those two armies standing ready for fighting the heroic Yudhisthira laid down his armour and excellent arms, descended from his chariot quickly and with folded arms and surrounded by his brothers, hastened on foot to Bhishma.

तमुवाच ततः पादौ कराभ्यां पीड्य पाण्डवः ।
'आमन्त्रये त्वां दुर्धर्ष त्वया योत्स्यामहे वयम् ।
अनुजानीहि मां तात आशिषश्च प्रयोजय ॥'

Holding Bhishma's feet with his hands, Yudhisthira said to him: "Unassailable warrior, I take your permission; we shall fight with you; permit me, father, and give (us) (your) blessings."

भीष्मः—

'प्रीतोऽहं पुत्र युध्यस्व जयमाप्नुहि पाण्डव ॥'

Bhishma—

"My son, I am pleased; fight and win Yudhisthira."

ततो युधिष्ठिरः प्रायादाचार्यस्य रथं प्रति ।
स द्रोणमभिवाद्याथ कृत्वा चाभिप्रदक्षिणम् ।
उवाच राजा दुर्धर्षमात्मनिःश्रेयसं वचः ॥

Then Yudhisthira proceeded towards his preceptor Drona's chariot. Saluting Drona and going around him, king Yudhisthira addressed to that unassailable Drona these words intended for his own welfare:

'आमन्त्रये त्वां भगवन् योत्स्ये विगतकल्मषः ॥'

"I take your leave, illustrious preceptor, and will fight with a pure heart."

द्रोणः—

'ध्रुवस्ते विजयो राजन् यस्य मन्त्री हरिस्तव ।
यतो धर्मस्ततः कृष्णो यतः कृष्णस्ततो जयः ॥'

Drona—

"King, victory is certain for you for whom Krishna is the counsellor. Where Dharma is, is Krishna and where Krishna is, is victory."

अनुमान्य तमाचार्यं प्रायाच्छारद्वतं प्रति ।
तं गौतमः प्रत्युवाच 'युध्यस्व जयमाप्नुहि' ॥

एवं विचिन्तयानस्तु प्राविशत्तं महाह्रदम् ॥

He thought of the words of the righteous and wise Vidura. "This great disaster to us and to all the Kshatriyas, surely the very wise Vidura foresaw long ago." So thinking, he entered the big lake.

ततः प्राप्तो धर्मराजस्तं ह्रदं सह सोदरैः ।
अभ्यभाषत कौन्तेयः प्रहसन्निव [भारत] ॥

Yudhisthira then reached that lake, along with his brothers and spoke, as if laughing:

'सर्वं क्षत्रं घातयित्वा स्वकुलं च विशांपते ।
जलाशयं प्रविष्टोऽद्य वाञ्छञ्जीवितमात्मनः ॥

स ते दर्पो नरश्रेष्ठ स च मानः क्व ते गतः ।
उत्तिष्ठ राजन् युध्यस्व क्षत्रियोऽसि कुलोद्भवः ॥'

"King, causing the death of the whole Kshatriya race and your own family, you have entered the lake now, wishing to save your own life! Where have that pride and that self-respect of yours gone, your best of men? Rise up, king, and fight; you are a Kshatriya, born of a great family."

दुर्योधनः—

'न प्राणहेतोर्न भयात् श्रमात्त्विदमनुष्ठितम् ।
न त्विदानीमहं मन्ये कार्यं युद्धेन कर्हिचित् ।
रतिर्हि नास्ति मे राज्ये हतपक्षस्य भारत ।
एषा ते पृथिवी राजन् भुंक्ष्वैनां विगतज्वरः ॥'

Duryodhana—

"This has been done by me on account of fatigue, not for saving my life, nor out of fear. And I do not think there is any purpose in fighting now; to me whose adherents have been killed, there is no love for the kingdom, Yudhisthira; this world is yours, king; enjoy it, without any pang."

युधिष्ठिरः—

'धर्मतो याचमानानां प्रशमार्थं कुलस्य नः।
सूच्यग्रं नात्यजः पूर्वं स कथं त्यजसि क्षितिम्॥

दहने हि कृतो यत्नस्त्वयाऽस्मासु विशेषतः।
आशीविषैर्विषैश्चापि जले चापि प्रवेशनैः।
त्वया विनिकृता राजन् राज्यस्य हरणेन च॥

अप्रियाणां च वचनैर्द्रौपद्याः कर्षणेन च।
एतस्मात्कारणात्पाप जीवितं ते न विद्यते॥'

Yudhisthira—

"You did not part with even a needle-end's space to us who, for the sake of the peace of our house, begged but righteously! How do you (now) give up the

kingdom? Great effort was made by you to burn us; with snakes and poisons, by drowning, by seizing our kingdom, by unkind words and by the dragging of Draupadi, we have been insulted by you, king. Because of this, you sinner, you shall not live."

श्रुत्वा स कटुका वाचस्स्कन्धे कृत्वाऽऽयसीं गदाम्।
उत्थितश्च जलात्तस्मात् पुत्रो दुर्योधनस्तव ॥

On hearing (those) bitter words, Duryodhana, son of Dhritarashtra, with his iron mace on his shoulder, rose up from the water.

दुर्योधनः—

'एकैकेन च मां यूयमासीदत युधिष्ठिर।
न ह्येको बहुभिर्न्याय्यो वीरो योधयितुं युधि ॥
न्यस्तवर्मा विशेषेण श्रान्तश्चाप्सु परिप्लुतः।
भृशं विक्षतगात्रश्च हतवाहनसैनिकः ॥'

Duryodhana—

"Yudhisthira, one by one, you encounter me; it is not proper in war to make one warrior fight against many. I especially am armourless, tired, submerged in water,

severely wounded in body and one whose conveyances and soldiers have been destroyed."

युधिष्ठिरः—

'यद्येकस्तु न हन्तव्यो बहुभिर्धर्म एव तु ।
तदाऽभिमन्युं बहवो निजघ्नुस्त्वन्मते कथम् ।
सर्वो विमृशते जन्तुः कृच्छ्रस्थो धर्मदर्शनम् ॥

आमुञ्च कवचं वीर येन त्वं योद्धुमिच्छसि ।
तं हत्वा वै भवान्राजा हतो वा स्वर्गमाप्नुहि ॥'

Yudhisthira—

"If it is Dharma that one should not be killed by many, how did many kill Abhimanyu with your consent? Everybody examines the codes of Dharma when in difficulty. Put on the armour, warrior, and killing whomsoever you want to fight with, become king; or being killed, attain to heaven."

ततो भीमबलो भीमो युधिष्ठिरमथाब्रवीत् ।
'अहमेतेन संगम्य संयुगे योद्धुमुत्सहे ।
राजा च धृतराष्ट्रोऽयं श्रुत्वा पुत्रं मया हतम् ।
स्मरिष्यत्यशुभं कर्म यत्तच्छकुनिबुद्धिजम् ॥'

Then, Bhima of terrible strength told Yudhisthira: "I can meet this Duryodhana in combat and fight. And king Dhritarashtra shall now think of that evil act born of Sakuni's intellect, on hearing his son, Duryodhana, killed by me."

अभवच्च तयोर्युद्धं न्यघ्नतां वै परस्परम् ॥

There was a fight between the two, Bhima and Duryodhana; they struck each other.

मण्डलानि विचित्राणि चरतोर्नृपभीमयोः ।
गदासंपातजास्तत्र प्रजज्ञुः पावकार्चिषः ॥

Flames arose out of the collision of the maces of Duryodhana and Bhima who made varied circular movements.

अथास्य समभिद्रुत्य समुत्पत्य च सिंहवत् ।
ऊरुभ्यां प्राहिणोद् [राजन्] गदां वेगेन पाण्डवः॥

Jumping then like a lion and running up to Duryodhana, Bhima aimed his mace with force at his thighs.

स पपात नरव्याघ्रः पुत्रस्तव [महीपते] ॥

Dhritarashtra's son, Duryodhana, the best of men, fell.

एवं दुर्योधनं हत्वा भीमसेनः प्रतापवान् ।
शिरश्च राजसिंहस्य पादेन समलोडयत् ॥

Having thus struck Duryodhana down, the valorous Bhima kicked the head of the great king, turning it with his foot this side and that.

वृकोदरं नृत्यमानं धर्मराजोऽब्रवीदिदम् ।
'गतोऽसि वैरस्यानृण्यं प्रतिज्ञा पूरिता त्वया ।
मा शिरोऽस्य पदा मर्दीः मा धर्मस्तेऽतिगो भवेत् ।
राजा ज्ञातिर्हतश्चायं नैतन्न्याय्यं तवानघ ॥'

Yudhisthira said this to the dancing Bhima: "You have cleared the debt of enmity; you have fulfilled your vow; do not kick his head with your foot; let not Dharma be transgressed by you; this Duryodhana who has been killed is a king and a kinsman; you sinless soul, this is not proper for you."

इत्युक्त्वा भीमसेनं तु साश्रुकण्ठो युधिष्ठिरः ।
उपसृत्याब्रवीद्दीनो दुर्योधनमरिन्दमम् ॥

Having spoken to Bhima in this manner, the dejected Yudhisthira, in a voice choked with grief, addressed the valorous Duryodhana, approaching him:

'आत्मनो ह्यपराधेन महद्व्यसनमीदृशम् ।
प्राप्तवानसि यल्लोभान्मदाद्बाल्याच्च भारत ॥

"By your own fault, by your avarice, haughtiness and childishness, you scion of Bharata, have come to such a great disaster.

'आत्मा न शोचनीयस्ते श्लाघ्यो मृत्युस्तवानघ ।
वयमेवाधुना शोच्यास्तैर्हीना बन्धुभिः प्रियैः ॥'

"Sinless Duryodhana, you must not feel sorry for yourself; laudable is your death. It is ourselves, bereft of those dear kinsmen, who should be pitied."

कृष्णः—

'रथेष्वारोहत क्षिप्रं गच्छामो वसुधाधिपाः ।
दिष्ट्या हतोऽयं पापात्मा सामात्यज्ञातिबान्धवः॥'

Krishna—

"Kings, mount the chariots quickly, we shall go. Luckily this sinner is killed together with his counsellors and kinsmen."

इति श्रुत्वा त्वधिक्षेपं कृष्णाद्दुर्योधनो नृपः ।
दृष्टिं भ्रूसंकटां कृत्वा वासुदेवे न्यपातयत् ॥

Hearing this taunt from Krishna, king Duryodhana cast his eye on him, knitting his brow.

दुर्योधनः—

'घातयित्वा महीपालानृजुयुद्धान्सहस्रशः ।
जिह्मैरुपायैर्बहुभिर्न ते लज्जा न ते घृणा ।
यदि मां चापि कर्णं च भीष्मद्रोणौ च संयुगे ।
ऋजुना प्रतियुध्येथा न ते स्याद्विजयो ध्रुवम् ॥'

Duryodhana—

"(Krishna), having killed thousands of kings who fought in a straightforward manner, through many deceitful means, have you no feeling of shame or self-contempt? If you had fought me, or Karna or Bhishma and Drona in a straightforward manner in the battle, surely, you would have had no victory."

कृष्णः—

'लोभेनातिबलेन त्वं तृष्णया च वशीकृतः ।
कृतवान्स्यकार्याणि विपाकस्तस्य भुज्यताम् ॥'

Krishna—

"You have committed sins, overpowered by your avarice and excess of strength. Let the consequence thereof be enjoyed."

दुर्योधनः—

'यदिष्टं क्षत्रबन्धूनां स्वधर्ममनुपश्यताम् ।
तदिदं निधनं प्राप्तं को नु स्वन्ततरो मया ॥

Duryodhana—

"I die the death which is dear to born Kshatriyas who follow their own Dharma; who can have a more glorious end than myself?"

'ससुहृत्सानुबन्धश्च स्वर्गं गन्ताऽहमच्युत ।
यूयं गर्हितसङ्कल्पाः शोचन्तो वर्तयिष्यथ ॥

"Krishna, I will go to heaven with my friends and followers! With despised desires, you will live, sorrowing.

'न मे विषादो भीमेन पादेन शिर आहतम् ।
काका वा कंकगृध्रा वा निधास्यन्ति पदं क्षणात् ॥'

"There is no sorrow for me that my head was kicked by Bhima with his foot; in a moment, crows, herons and vultures are going to place their feet (on my head).'

अस्य वाक्यस्य निधने कुरुराजस्य धीमतः ।
अपतत्सुमहद्वर्षं पुष्पाणां पुण्यगन्धिनाम् ॥

At the end of these words of the intelligent Kuru king, Duryodhana, a very big shower of fragrant flowers fell.

ततस्ते प्रययुस्सर्वे निवासाय महीक्षितः ।
शङ्खान्प्रध्मापयन्तो वै हृष्टाः परिघबाहवः ॥

Then all those kings of bolt-like arms, went to their camps, jubilant and blowing their conches.

अथाब्रवीन् [महाराज] वासुदेवो महायशाः ।
'अस्माभिर्मङ्गलार्थाय वस्तव्यं शिबिराद्बहिः ॥'
तथेत्युक्त्वा हि ते सर्वे ययुरोघवतीं [नृप] ॥

Then the renowned Krishna said: "We must live outside our camp for the sake of auspiciousness." Agreeing, all of them went to the river Oghavati.

गान्धार्याश्शोकदीप्तायाः प्रशमार्थम् [अरिन्दम] ।
ततः प्रायान् [महाराज] माधवो नागसाह्वयम् ॥

To calm Gandhari who was burning with her sorrow, Krishna then went to Hastinapura.

उवाच प्रश्रितं वाक्यं धृतराष्ट्रमरिन्दमः ।
'याचितस्त्वं शमं नित्यं न च तत्कृतवानसि ।
अल्पोऽप्यतिक्रमो नास्ति पाण्डवानां महात्मनाम् ।
कुलं पिण्डश्च तव वै पाण्डवेषु प्रतिष्ठितम् ।
शिवेन पाण्डवान्ध्याहि नमस्ते भरतर्षभ ॥'

Krishna, the subduer of his enemies, said these words in modesty to Dhritarashtra: "You were begged every day for peace and you did not make peace. There has not been even a slight transgression on the part of the high-souled Pandavas. The continuation of your family and the offering of ancestral oblation to you rest with the Pandavas. Look upon the Pandavas with friendliness; my obeisance to you, chief of the Bharatas!"

उवाच परमं वाक्यं गान्धारीं शोककर्शिताम् ।
'धर्मार्थसहितं वाक्यमुभयोः पक्षयोर्हितम् ।
उक्तवत्यसि कल्याणि न च ते तनयैः कृतम् ॥

To Gandhari who was emaciated with grief, Krishna said (these) best words:

"Auspicious lady! words of moral and material good, and beneficent to both parties, you spoke; and they were not acted up to by your sons.

'दुर्योधनस्त्वया चोक्तो जयार्थी परुषं वचः।
"शृणु मूढ वचो मह्यं यतो धर्मस्ततो जयः।"
तदिदं समनुप्राप्तं तव वाक्यं नृपात्मजे।
एवं विदित्वा कल्याणि मा स्म शोके मनः कृथाः॥'

"And you spoke harsh words to Duryodhana, who was seeking victory: 'Hear these words from me, you stupid fellow! Where Dharma is, there victory shall be." Queen, those words of yours have come true now. Auspicious lady, take it so and grieve not."

समाश्वास्य च गान्धारीं धृतराष्ट्रं च माधवः।
आगम्य शिबिरं रात्रौ सोऽभ्यगच्छत पाण्डवान्॥

After consoling Gandhari and Dhritarashtra, Krishna returned to the camp in the night and met the Pandavas.

अश्वत्थामा कृपश्चैव कृतवर्मा च सात्वतः ।
तत्रापश्यन्महात्मानं धार्तराष्ट्रं निपातितम् ॥

Asvatthaman, Kripa and Kritavarman the Satvata, saw there the great Duryodhana thrown down.

द्रौणिः क्रोधेन जज्वाल राजानमिदमब्रवीत् ।
'अद्य रात्रौ महाराज निहनिष्यामि पाण्डवान्' ॥

Asvatthaman blazed up with anger and told the king: "King, to-night, I will kill all the Pandavas."

तच्छ्रुत्वा वचनं द्रौणेः कृपश्शारद्वतस्ततः ।
द्रौणिं राज्ञो नियोगेन सैनापत्येऽभ्यषेचयत् ॥

Hearing those words of the son of Drona, Kripa, by the order of king Duryodhana, then installed the son of Drona in the office of the general.

॥ इति शल्यपर्व समाप्तम् ॥

THUS ENDS THE SALYA PARVA

॥ अथ सौप्तिकपर्व ॥

SAUPTIKA PARVA

ततोऽस्तं पर्वतश्रेष्ठमनुप्राप्ते दिवाकरे ।
रात्रिञ्चराणां सत्त्वानां निनादोऽभूत्सुदारुणः ।
क्रव्यादाश्च प्रमुदिता घोरा प्राप्ता च शर्वरी ॥

Then, when the sun had reached the great mountain of setting, there was the very frightful noise of nocturnal beings; carnivorous animals and demons rejoiced; terrible night set in.

कृतवर्माणमामन्त्र्य कृपं च स महारथः ।
द्रौणिर्मन्युपरीतात्मा प्राविशत् शिविरं महत् ।
धृष्टद्युम्नस्य निलयं शनकैरभ्युपागमत् ॥

Taking leave of Kritavarman and Kripa, that great warrior Asvatthaman, consumed

by rage, entered the big camp of the Pandavas, and slowly approached the abode of Dhrishtadyumna.

द्रौणिः क्रूरं मनः कृत्वा पाञ्चाल्यमवधीत्तदा ।
संसुप्तानेव पाञ्चालवीरान्न्यहनदन्तिके ॥

With a cruel mind, the son of Drona killed the son of the Panchala king (Dhrishtadyumna) and the (other) Panchala warriors even as they were in deep sleep by the side (of Dhrishtadyumna).

अपश्यद् द्रौपदीपुत्रान् खड्गेन व्यधमत्ततः ॥

He saw the sons of Draupadi and slew them with his sword then.

शिखण्डिनं समासाद्य द्विधा चिच्छेद सोऽसिना ॥

Meeting with Sikhandin, he cut him in two with his sword.

कृपश्चैव [महाराज] हार्दिक्यश्चैव दुर्मतिः ।
त्रिषु देशेषु ददतुश्शिबिरस्य हुताशनम् ॥

Kripa and the evil-minded Hardikya (Kritavarman) set fire to the Pandava camp in three places.

तस्या रजन्यास्त्वर्धेन पाण्डवानां महद्बलम् ।
गमयामास [राजेन्द्र] द्रौणिर्यमनिवेशनम् ॥

Within a half of that night, Asvatthaman put to death that big army of the Pandavas.

प्रत्यूषकाले निष्क्रम्य ताभ्यां संगम्य वीर्यवान् ।
गत्वा शयानं राजानं पुनर्वचनमब्रवीत् ॥

Getting out (of the Pandava camp) at daybreak, and joining with those two, Kripa and Kritavarman, the valorous Asvatthaman went again to the king (Duryodhana) who was lying (on the ground), and said:

'दुर्योधन जीवसि चेद्वाक्यं श्रोत्रसुखं श‍ृणु ।
सप्त पाण्डवतश्शिष्टा धार्तराष्ट्रास्त्रयो वयम् ।
पाञ्चाला निहतास्सर्वे हतपुत्रा हि पाण्डवाः ।
सौप्तिके शिबिरं तेषां हतं सनरवाहनम् ॥'

"Duryodhana, if you still live, hear these words which would give happiness to your ears. Of the Pandavas, seven remain; among those on Dhritarashtra's side, we three remain. All the Panchalas

have been killed; the sons of the Pandavas have been killed; in an onslaught while everybody was sleeping, their camp, along with men, vehicles and animals, has been destroyed."

'न मेऽकरोत्तद्गाङ्गेयो न कर्णो न च ते पिता ।
यत्त्वया कृपभोजाभ्यां सहितेनाद्य मे कृतम् ॥
इत्येवमुक्त्वा निधनं यातो दुर्योधनो [नृप] ॥

"(Asvatthaman), what has been done for me by you, along with Kripa and the Bhoja (Kritavarman), that Bhishma did not do me, nor Karna, not even your father." Having said so, Duryodhana died.

सौप्तिके कदनं श्रुत्वा धर्मात्मा पर्यदेवयत् ।
'जीयमाना जयन्त्यन्ये जयमाना वयं जिताः ।
ये व्यमुच्यन्त कर्णस्य प्रमादात्त इमे हताः ।
न हि प्रमादात्परमस्ति कश्चित्
वधो नराणामिह जीवलोके ।
तीर्त्वा समुद्रं वणिजस्समृद्धा
मग्नाः कुनद्यामिव सीदमानाः ॥'

Hearing of the slaughter in the nocturnal attack, Yudhisthira wept: "Conquered, others conquer; conquering, we are conquered. These sons of ours who escaped Karna, have been killed by our carelessness. There is no greater death to men in this world than carelessness. We perish like rich merchants who, after crossing the seas, are drowned in a little steam."

कृष्णा राजानमासाद्य शोकार्ता न्यपतद्भुवि ।
रुदती पाण्डवज्येष्ठमिदं वचनमब्रवीत् ॥

Coming to Yudhisthira, the sorrow-stricken Draupadi fell on the ground, and weeping, spoke these words to Yudhisthira:

'द्रोणपुत्रस्य सहजो मणिः शिरसि मे श्रुतः ।
निहत्य संख्ये तं पापं पश्येयं मणिमाहृतम् ॥'

"I have heard that there is a jewel on the head of Asvatthaman, born along with his body; I would see that sinner killed in battle and the jewel brought (to me)."

तमभ्यधावत्कौन्तेयः प्रगृह्य सशरं धनुः ॥

Yudhisthira rushed at Asvatthaman, taking his bow and arrows.

जग्राह च शरैषीकां द्रौणिस्सव्येन पाणिना ।
'अपाण्डवाय' इति रुषा तदस्त्रं प्रमुमोच ह ॥

Asvatthaman took in his left hand the Ishika Astra and saying in anger: "For the end of the Pandavas," he discharged the divine missile.

'विसृजैतत्त्वमप्याजावस्त्रमस्त्रनिवारणम् ।'
केशवेनैवमुक्तोऽथ पाण्डवः परवीरहा ।
उत्ससर्ज शिवं ध्यायन्नस्त्रमस्त्रेण शाम्यताम् ॥

"You also send forth in this fight, this divine missile (of yours) that can counteract Asvatthaman's missile." So told by Krishna, Arjuna, the destroyer of enemy-warriors shot his missile, contemplating upon god Siva, so that Asvatthaman's missile might be put down by his own.

नारदस्सर्वधर्मात्मा भरतानां पितामहः ।
उभौ शमयितुं वीरौ भारद्वाजधनञ्जयौ ।
दीप्तयोरस्त्रयोर्मध्ये स्थितौ परमतेजसौ ॥

Sage Narada and the grandfather of the Bharatas, Vyasa, the embodiment of all Dharmas, stood with their supreme splendour, between the two blazing missiles, to calm the two warriors, Asvatthaman and Arjuna.

सञ्जहार शरं दिव्यं त्वरमाणो धनञ्जयः ।
अशक्तः प्रतिसंहारे परमास्त्रस्य संयुगे ।
द्रौणिर्दीनमना [राजन्] गर्भेषु प्रमुमोच ह ॥

Hastening, Arjuna withdrew the divine arrow. Incapable of withdrawing that supreme missile in the battle, Asvatthaman, with a dejected mind, discharged it at the womb (of Uttara).

तदाज्ञाय हृषीकेशो द्रौणिं प्रत्यब्रवीत्तदा ।
'परीक्षिद्भविता ह्येषां पुनर्वंशकरस्सुतः ।
अहं तं जीवयिष्यामि दग्धं शस्त्राग्नितेजसा ॥'

Knowing that Asvatthaman had discharged the missile of Brahmasiras at Uttara's womb, Krishna said to him: "There will be born a son, Parikshit, the continuer of the

Pandavas' line. I shall bring to life that Parikshit burnt by the heat of the fire of your missile."

प्रदायाथ मणिं द्रौणिः पाण्डवानां महात्मनाम् ।
जगाम विमनास्तेषां सर्वेषां पश्यतां वनम् ॥

Handing over his gem to the high-souled Pandavas then, the distracted Asvatthaman went to the forest, even as all of them were looking on.

पाण्डवाश्च सदाशार्हा मणिमादाय सत्वराः ।
द्रौपदीमभ्यधावन्त दुःखशोकसमन्विताम् ॥

Taking the precious stone of Asvatthaman, the Pandavas, along with Krishna, rushed up in haste to the distressed and sorrowing Draupadi.

द्रौपदी—

'केवलानृण्यमाप्ताऽस्मि गुरुपुत्रो गुरुर्मम ।
शिरस्येतं मणिं राजा ग्रहीतुमनघोऽर्हति ॥'

Draupadi—

"I am simply rid of my debt (of avenging the murder of my sons); the son of the preceptor is a preceptor to me. The spotless king (Yudhisthira) deserves to wear this jewel on his head.

ततो दिव्यं मणिवरं शिरसा धारयन्प्रभुः ।
शुशुभे स तदा राजा सचन्द्र इव पर्वतः ॥

Wearing then that excellent celestial gem on his head, king Yudhisthira shone at that time like a mountain with the moon on it.

॥ इति सौप्तिकपर्व समाप्तम् ॥

THUS ENDS THE SAUPTIKA PARVA.

॥ अथ स्त्रीपर्व ॥

STRI PARVA

ततः प्रणादस्संजज्ञे सर्वेषु कुरुवेश्मसु ।
आकुमारं पुरं सर्वमभवच्छोककर्शितम् ॥

Then arose the loud noise (of wailings) in all the mansions of the Kauravas and the whole city of Hastinapura, down to the boys, became sorrow-stricken.

अदृष्टपूर्वा या नार्यः पुरा देवगणैरपि ।
ताभिः परिवृतो राजा रुदतीभिस्सहस्रशः ।
निर्ययौ नगराद्दीनस्तूर्णमायोधनं प्रति ॥

Surrounded by thousands of those wailing women who had not been seen before even by the gods, the dejected king Dhritarashtra left in haste his city for the battle-field.

शुश्रुवे पितरं वृद्धं निर्यान्तं गजसाह्वयात् ।
शोचमानो [महाराज] भ्रातृभिस्सहितस्तदा ।
अन्वीयमानो वीरेण दाशार्हेण महात्मना ।
ववन्दे पितरं ज्येष्ठं धर्मराजो युधिष्ठिरः ॥

The grieving Yudhisthira heard that his old uncle was coming out from Hastinapura; along with his brothers and accompanied by the great and heroic Krishna, he paid his respects to his eldest uncle.

तमात्मजान्तकरणं पिता पुत्रवधार्दितः ।
अप्रीयमाणश्शोकार्तः पाण्डवं परिषस्वजे ।
दुष्टात्मा भीममन्वैच्छद्दिधक्षुरिव पावकः ॥

Tormented on account of the slaughter of his sons and stricken with sorrow, the father, Dhritarashtra, embraced Yudhisthira who had killed his sons, without liking him. The evil-minded Dhritarashtra (then) sought for Bhima, wishing to burn him like fire.

तस्य सङ्कल्पमाज्ञाय भीमं प्रत्यशुभं हरिः ।
भीममाक्षिप्य पाणिभ्यां प्रददौ भीममायसम् ।
बभञ्ज बलवान्राजा मन्यमानो वृकोदरम् ॥

Knowing the evil intention of Dhritarashtra towards Bhima, Krishna drew Bhima aside with his hands and presented an iron image of Bhima; taking it for Bhima, the strong king (Dhritarashtra) crushed it.

हतो भीम इति ज्ञात्वा नृपश्शोकसमन्वितः ॥

Thinking that Bhima had been killed, king Dhritarashtra became sorrowful!

वासुदेवो वरः पुंसामिदं वचनमब्रवीत् ।
'मा शुचो धृतराष्ट्र त्वं नैव भीमस्त्वया हतः ।
आयसी प्रतिमा ह्येषा त्वया निष्पातिता विभो॥'

Krishna, the best of men, said these words: "Dhritarashtra, grieve not; Bhima has not been killed by you; king, it is an iron image (of Bhima) that has been destroyed by you."

धृतराष्ट्रः—

'इदानीं त्वहमव्यग्रो गतमन्युर्गतज्वरः ।
पाण्डुपुत्रेषु मे धर्मः प्रीतिश्चाप्यवतिष्ठते ॥'

Dhritarashtra—

"Now I am undistracted, with my anger and mental anguish gone; Dharma and love are firmly established in me towards the sons of Pandu."

अभ्ययुर्भ्रातरस्सर्वे गान्धारीं सहकेशवाः ।
गान्धारी विगतक्रोधा सान्त्वयामास मातृवत् ॥

With Krishna, all the brothers went to Gandhari and she, with her anger gone, consoled them like a mother.

पाण्डवा अभ्यगच्छन्त पृथां पृथुलवक्षसः ।
चिरस्य दृष्ट्वा पुत्रान्सा बाष्पमाहारयत्पृथा ।
अन्वशोचत दुःखार्ता द्रौपदीं निहतात्मजाम् ॥

The broad-chested Pandavas met Kunti (their mother); seeing her sons after a long time, Kunti wept and afflicted with grief, she condoled with Draupadi whose sons had been killed.

ततः कोपपरीताङ्गी पुत्रशोकपरिप्लुता।
जगाद शौरिं दोषेण गान्धारी व्यथितेन्द्रिया॥

Then, with body consumed by anger, overwhelmed with grief at her sons' loss and with agonied senses, Gandhari found fault with Krishna.

'यस्मात्परस्परं घ्नन्तो ज्ञातयः कुरुपाण्डवाः।
उपेक्षितास्ते गोविन्द तस्माज्ज्ञातीन्वधिष्यसि॥
त्वमप्युपस्थिते वर्षे षट्त्रिंशे मधुसूदन।
हतज्ञातिर्हतामात्यो हतपुत्रो वनेचरः।
अनाथवदविज्ञातो निधनं समवाप्स्यसि॥'

"Krishna, since the kinsmen, the Kauravas and the Pandavas, killing each other were neglected by you, you shall kill your own kinsmen; you also, in the thirty-sixth year (from now), with your kinsmen, ministers and sons killed, shall meet with death, wandering in the forests, unknown and helpless."

तच्छ्रुत्वा वचनं घोरं वासुदेवो महामनाः।
उवाच देवीं गान्धारीमीषदभ्युत्स्मयन्निव॥

Hearing those terrible words, the magnanimous Krishna, appearing to smile a little, told queen Gandhari:

'संहर्ता वृष्णिचक्रस्य नान्यो मद्विद्यते शुभे ॥'

"Auspicious lady! there is none except myself who can destroy the Vrishnis."

ततः पितॄणां भ्रातॄणां पतीनां च कुरुस्त्रियः ।
उदकं चक्रिरे सर्वा रुदन्त्यो भृशदुःखिताः ॥

Very much afflicted and weeping, all the Kaurava women offered the libations of water to the manes of their fathers, brothers, and husbands.

ततः कुन्ती [महाराज] पुत्रान्वचनमब्रवीत् ।
'यं सूतपुत्रं मन्यध्वं राधेयमिति पाण्डवाः ।
कुरुध्वमुदकं तस्य भ्रातुरक्लिष्टकारिणः ।
स हि वः पूर्वजो भ्राता भास्करान्मय्यजायत ॥'

Kunti then told her sons: "Sons of Pandu! him whom you take as the son of the charioteer and (his wife) Radha, to that

brother of yours of irreproachable acts, offer water; for he is your eldest brother, borne by me to the Sun-god."

श्रुत्वा तु पाण्डवास्सर्वे मातुर्वचनमप्रियम् ।
कर्णमेवानुशोचन्तो भूयश्चात्यातुरा भवन् ॥

Hearing those unpleasant words of their mother, all the Pandavas mourned for Karna among all persons, and became all the more exceedingly tormented.

॥ इति स्त्रीपर्व समाप्तम् ॥

THUS ENDS THE STRI PARVA.

॥ अथ शान्तिपर्व ॥

SANTI PARVA

स राजा पुत्रपौत्राणां सम्बन्धिसुहृदां स्मरन् ।
निर्वेदमगमद्धीमान् राज्ये सन्तापपीडितः ॥

Thinking of his sons and grandsons, his kinsmen and friends (who had been killed in the battle) and afflicted with grief, the wise king Yudhisthira became disgusted with the kingdom.

सोऽनुनीतो [नरव्याघ्र] विष्टरश्रवसा स्वयम् ।
द्वैपायनेन चान्यैश्च स्वपुरं प्रविवेश ह ॥

Persuaded by Krishna Himself, Vyasa and others also, Yudhisthira entered his city, Hastinapura.

काञ्चने प्राङ्मुखो हृष्टो न्यषीदत्परमासने ।
ततः प्रकृतयस्सर्वाः पुरस्कृत्य पुरोहितम् ।
ददृशुर्धर्मराजानमादाय बहुमङ्गलम् ॥

Joyously, he sat on an excellent golden seat, facing the East. Then all the subjects with the chief priest at their head, met Yudhisthira, taking auspicious objects in their hands.

व्याघ्रचर्मोत्तरे शुक्ले सर्वतोभद्र आसने ।
उपवेश्य महात्मानं कृष्णां च द्रुपदात्मजाम् ।
तत उत्थाय दाशार्हः शङ्खमादाय पूरितम् ।
अभ्यषिञ्चत्पतिं पृथ्व्याः कुन्तीपुत्रं युधिष्ठिरम्॥

Seating the high-souled Yudhisthira and Draupadi on a white, square seat covered with the tiger's skin, Krishna then arose, and taking the conch filled with coronation-water, anointed Yudhisthira, son of Kunti, as king.

पौरजानपदान्सर्वान् विसृज्य कुरुनन्दनः ।
सोऽभिगम्य महात्मानं विष्णुं पुरुषसत्तमम् ।
उवाच मधुरं राजा स्मितपूर्वमिदं तदा ।
'वयं राज्यमनुप्राप्ताः पृथिवी च वशे स्थिता ।
तव प्रसादाद् भगवंस्त्रिलोकगतविक्रम ॥'

After sending away all the citizens and the men from the country, king Yudhisthira approached Krishna, the best of men, and smiling, said sweetly on that occasion: "Lord, whose valour pervades all the three worlds! By your grace, we have got the kingdom back and the world is in our control."

तं तथा भाषमाणं तु धर्मराजमरिन्दमम् ।
नोवाच भगवान् किञ्चिद् ध्यानमेवान्वपद्यत ॥

The Lord spoke not anything to Yudhisthira, the subduer of enemies, who was talking in that manner; He was absorbed in contemplation.

युधिष्ठिरः—

'किमिदं परमाश्चर्यं ध्यायस्यमितविक्रम ॥'

Yudhisthira—

"Greatest wonder! You of immense valour! What is it that you are meditating upon?"

वासुदेवः—

'शरतल्पगतो भीष्मः शाम्यन्निव हुताशनः।
मां ध्याति पुरुषव्याघ्रस्ततो मे तद्गतं मनः॥

Krishna—

"Lying on the bed of arrows, looking like a fire that is dying out, that illustrious man, Bhishma, is thinking of me; therefore my mind has gone to him.

'स हि धर्मविदां श्रेष्ठस्तस्मिन् शान्ते महात्मनि।
भविष्यति मही पार्थ नष्टचन्द्रेव शर्वरी॥

"He is the greatest of those who know the Dharmas; and when he is dead, Yudhisthira, the world would be like the night that has lost the moon.

'तद्भीष्ममुपसंगृह्य पृच्छ यत्ते मनोगतम्॥

"Therefore, taking hold of his feet in reverence, ask of him what is in your mind.

'तस्मिन्नस्तमिते भीष्मे कौरवाणां धुरन्धरे।
ज्ञानान्यल्पीभविष्यन्ति तस्मात्त्वां चोदयाम्यहम्॥'

"When that Bhishma, the Kaurava chief, passes away, knowledge (of several things) will dwindle; hence do I urge you."

ततस्स च हृषीकेशः स च राजा युधिष्ठिरः ।
कृपादयश्च ते सर्वे चत्वारः पाण्डवाश्च ते ।
ययुराशु कुरुक्षेत्रं वाजिभिश्शीघ्रगामिभिः ॥

Then that Krishna, that king Yudhisthira, Kripa and all those (others) and those four Pandavas proceeded quickly to Kurukshetra by swift horses.

ततस्ते ददृशुर्भीष्मं शरप्रस्तरशायिनम् ।
उपास्यमानं मुनिभिर्नदीमोघवतीमनु ॥

They then saw Bhishma lying on the bed of arrows, on the bank of the river Oghavati, attended upon by sages.

किञ्चिद्दीनमना भीष्ममिति होवाच केशवः ॥

With a slightly dejected mind, Krishna said thus to Bhishma:

'त्वं पाण्डवेयस्य मनस्समुत्थितं
नरेन्द्र शोकं व्यपकर्ष मेधया ।
भवद्विधा ह्युत्तमबुद्धिविस्तरा
विमुह्यमानस्य जनस्य शान्तये ॥'

"King of men, remove by your wisdom the sorrow that has risen in the mind of Yudhisthira; those like you, with an abundance of excellent wisdom, are the persons for calming the bewildered people."

भीष्मः—

'युवेवास्मि समावृत्तः त्वदनुध्यानवृंहितः ।
वक्तुं श्रेयस्समर्थोऽस्मि त्वत्प्रसादाज्जनार्दन ॥'

Bhishma—

"Strengthened by contemplation upon you, I seem to have turned into a youth; Krishna, by your grace, I am competent to speak of what promotes welfare.

'नमो धर्माय महते नमः कृष्णाय वेधसे ।
ब्राह्मणेभ्यो नमस्कृत्य धर्मान्वक्ष्यामि शाश्वतान्॥

"Obeisance to the great Dharma, obeisance to the creator Krishna. Making obeisance to the Brahmins, I will speak of the eternal Dharmas.

'आदावेव कुरुश्रेष्ठ राज्ञा रञ्जनमिच्छता ।
देवतानां द्विजानां च वर्तितव्यं यथाविधि ॥

"First of all, you best of the Kurus, (Yudhisthira), the king who wants to please his subjects, must conduct himself towards gods and Brahmins in the prescribed manner.

'उत्थानेन सदा पुत्र प्रयतेथा [युधिष्ठिर] ।
न ह्युत्थानमृते दैवं राज्ञामर्थं प्रसाधयेत् ॥
पौरुषं हि परं मन्ये दैवं निश्चित्य मुह्यते ॥

"Son, always strive with exertion; without exertion, Fate will not achieve their purpose for kings. I consider human endeavour as greater; by believing in Fate, one confounds oneself.

'न हि सत्यादृते किञ्चिद् राज्ञां वै सिद्धिकारकम् ।
आर्जवं सर्वकार्येषु श्रयेथाः [कुरुनन्दन] ॥

"Nothing except truthfulness brings success to kings. Adopt straightforwardness in all actions.

'मृदुर्हि राजा सततं लङ्घ्यो भवति सर्वशः ।
तीक्ष्णाच्चोद्विजते लोकस्तस्मादुभयमाचरेत् ॥

"A king who is always soft is violated on all sides; and the world dreads the severe; so, one should adopt both (softness and severity).

'व्यसनानि च सर्वाणि त्यजेथा भूरिदक्षिण ॥

"Giver of ample sacrificial gifts! Avoid all vicious addictions.

'वर्तितव्यं [कुरुश्रेष्ठ] सदा धर्मानुवर्तिना ।
स्वं प्रियं तु परित्यज्य यद्यल्लोकहितं भवेत् ॥

"A king following Dharma must always stand for whatever is good for the world, renouncing what is pleasant to himself.

'पुत्रा इव पितुर्गेहे विषये यस्य मानवाः ।
निर्भया विचरिष्यन्ति स राजा राजसत्तमः ॥

"That king is the best king in whose country, the people move about without fear, like sons in their father's house.

'आत्मा जेयस्सदा राज्ञा ततो जेयाश्च शत्रवः ।
धर्मार्थौ प्रतिगृह्णीयात् कामक्रोधौ च वर्जयेत् ॥

"His own self must be conquered by the king for all time; then only are his enemies to be conquered.

"Adopting virtue and material good, he should avoid passion and anger.

'अर्थमूलोऽपि हिंसां च कुरुते स्वयमात्मनः ।
करैरशास्त्रदृष्टैर्हि मोहात्संपीडयन्प्रजाः ॥

"Harassing the subjects in his ignorance by taxes not found in the texts, and motivated by Artha only, the king does harm to himself.

'कृपणानाथवृद्धानां विधवानां च योषिताम् ।
योगक्षेमं च वृत्तिं च नित्यमेव प्रकल्पयेत् ॥

"The king should always make arrangements for the security and maintenance of the poor, the helpless, the old and the widowed women.

'मा ते राष्ट्रे याचनका भवेयुर्मा च दस्यवः ॥

"Let there be no beggars and no thieves in your kingdom.

'दुर्बलस्य च यच्चक्षुर्मुनेराशीविषस्य च ।
अविषह्यतमं मन्ये मा स्म दुर्बलमासदः ॥

"I think that the eye of the weak, of the sage and of the serpent is most unbearable; do not assail the weak.

'दुर्बलांस्तात मन्येथा नित्यमेवाविमानितान् ।
मा त्वां दुर्बलचक्षूंषि प्रदहेयुस्सबान्धवम् ॥
विमानितो हतः क्लिष्टस्त्रातारं चेन्न विन्दति ।
अमानुषकृतस्तत्र दण्डो हन्ति नराधिपम् ॥
मा स्म तात बलस्थस्त्वं भुञ्जीथा दुर्बलं जनम् ॥
यानि मिथ्याभिशस्तानां पतन्त्यश्रूणि रोदताम् ।
तानि पुत्रान्पशून्घ्नन्ति तेषां मिथ्याभिशंसिनाम् ॥

"Son, consider that the powerless must never be insulted; let not the eyes of the weak burn you and your kinsmen. If one insulted, beaten, or harassed, does not get his saviour, in that kingdom, divine punishment kills the king. (My) son, remaining in power, don't you live upon the powerless people. The tears that fall from those who weep, being falsely accused, kill the sons and cattle of those who make the false accusation.

'अयुद्धेनैव विजयं वर्धयेद्वसुधाधिपः ।
जघन्यमाहुर्विजयं युद्धेन च [नराधिप] ॥

A king should build up his victory by means other than war; victory through war is said to be the worst.

'धर्मेण निधनं श्रेयो न जयः पापकर्मणा ॥

Death through Dharma is better than victory through a sinful act.

'पापस्य यदधिष्ठानं तच्छृणुष्व नराधिप ।
एको लोभो महाग्राहो लोभात्पापं प्रवर्तते ।
अतः पापमधर्मश्च तथा दुःखमनुत्तमम् ।
निकृत्या मूलमेतद्धि सर्वं लोभात्प्रवर्तते ।
स लोभस्सह मोहेन विजेतव्यो जितात्मना ॥

"King, hear that which forms the basis of sin. Avarice, that huge rapacious animal, (is the one basis of sin); it is from avarice that sin proceeds; from it proceed sin, unrighteousness and worst misery; this is the root-cause of fraud; everything proceeds from avarice. By the self-possessed person, this avarice, along with delusion, has to be conquered.

'रागो द्वेषस्तथा मोहो हर्षश्शोकोऽभिमानिता ।
क्रोधो दर्पश्च तन्द्री च परवृद्ध्युपतापिता ।
अज्ञानमेतन्निर्दिष्टं पापानां चैव याः क्रियाः ॥

"Passion, hate, delusion, exhilaration, dejection, conceit, anger, pride, laziness, being pained at others' prosperity and acts of sin—these are indicated as constituting Ignorance.

'दमेन सदृशं धर्मं नान्यं लोकेषु शुश्रुम ।
क्षमा धृतिरहिंसा च समता सत्यमार्जवम् ।
इन्द्रियाभिजयो दाक्ष्यं मार्दवं ह्रीरचापलम् ।
अकार्पण्यमसंरम्भस्सन्तोषः प्रियवादिता ।
अविहिंसाऽनसूया चाप्येषां समुदयो दमः ॥

"We have not heard in the entire universe of another Dharma equal to self-control. Forbearance, fortitude, non-injury, equanimity, truthfulness, straightforwardness, conquest of the senses, adeptness in the discharge of one's duties, softness, a sense of shame at doing what ought not to be done, absence of fickleness, non-wretchedness, absence of flurry, contentment,

sweet-speech, not hurting and freedom from envy—the sum-total of all these is Self-control.

'धर्मस्सनातनस्सत्यं सत्यं ब्रह्म सनातनम् ।
सत्यं यज्ञः परः प्रोक्तः सर्वं सत्ये प्रतिष्ठितम् ॥

"Truthfulness is the eternal Dharma; truthfulness is the eternal Brahman; truthfulness is the greatest offering to God; everything is based on truthfulness.

'सत्यं त्रयोदशविधं सर्वलोकेषु [भारत] ।
सत्यं च समता चैव दमश्चैव न संशयः ।
अमात्सर्यं क्षमा चैव ह्रीस्तितिक्षाऽनसूयता ।
त्यागो ध्यानमथार्यत्वं धृतिश्च सततं दया ।
अहिंसा चैव [राजेन्द्र] सत्याकारास्त्रयोदश ॥

"Truthfulness is of thirteen kinds in the universe: Truth-speaking, equanimity, self-control without doubt, absence of jealousy, forbearance, sense of shame, endurance, freedom from spite, renunciation, meditation, nobility, freedom from the effects of happiness and misery, constant

mercifulness, non-injury—these are the thirteen* forms of Truthfulness.

'यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥

"That happiness which is in the fulfilment of desires in this world and that great happiness, which is in heaven, these are not equal to even one-sixteenth of the happiness that is in the cessation of desire.

'यदा संहरते कामान् कूर्मोऽङ्गानीव सर्वशः ।
तदाऽऽत्मज्योतिरात्मश्रीरात्मन्येव प्रसीदति ॥

"When one withdraws all desires into himself, as a tortoise its limbs, then the light and splendour of the soul become manifest within oneself.

'न बिभेति यदा चायं यदा चास्मान्न बिभ्यति ।
यदा नेच्छति न द्वेष्टि ब्रह्म सम्पद्यते तदा ॥
यदा न कुरुते धीरः सर्वभूतेषु पापकम् ।
कर्मणा मनसा वाचा ब्रह्म सम्पद्यते तदा ॥

* Though 13 is the number expressly mentioned twice, there are 14 enumerated.

"When he does not fear and when of him none is afraid, when he neither likes nor dislikes, then does a man become the Brahman. When, being a man of wisdom, he does not sin against any being, in act, mind or speech, then does a man become the Brahman.

'मृत्युनाऽभ्याहतो लोको जरया परिवारितः।
अहोरात्राः पतन्त्येते ननु कस्मान्न बुध्यसे ॥
अद्यैव कुरु यच्छ्रेयो मा त्वां कालोऽत्यगादयम्।
अकृतेष्वेव कार्येषु मृत्युर्वै संप्रकर्षति ॥

"The world is struck with death and surrounded by old age. Days and nights speed by; why are you not awake? Even now, do what is to your welfare; let not time pass you. Even as your acts are not finished, death drags you.

'अमृतं चैव मृत्युश्च द्वयं देहे प्रतिष्ठितम्।
मृत्युरापद्यते मोहात् सत्येनापद्यतेऽमृतम् ॥

"Immortality and death—both are established in the body; death takes place out of ignorance; immortality comes as a result of truth.

"

'नास्ति विद्यासमं चक्षुर्नास्ति सत्यसमं तपः ।
नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम् ॥

"There is no eye equal to learning, no penance equal to truth, no misery like passion, no happiness like sacrifice.

'न सुखं प्राप्य संहृष्येन्नासुखं प्राप्य संज्वरेत् ॥

"Attaining happiness, one should not become excited; nor should one get into a fever, on getting misery.

'आकिञ्चन्यं सुखं लोके पथ्यं शिवमनामयम् ।
अनमित्रपथो ह्येष दुर्लभः सुलभस्सताम् ॥
अकिञ्चनस्य शुद्धस्य न तुल्यमिह लक्षये ।
आकिञ्चन्यं च राज्यं च तुलया समतोलयम् ।
अत्यरिच्यत दारिद्र्यं राज्यादपि गुणाधिकम् ॥
नित्योद्विग्नो हि धनवान् मृत्योरास्यगतो यथा ॥

"(Voluntary) poverty is happiness in this world, is wholesome, good and free from any trouble; it is the path in which one has no enemies, a difficult path, but easy for the good. To the pure person who

owns nothing, I find here none equal. I weighed on the scales poverty and kingdom; superior in its virtues, poverty weighed more. Eternally alarmed is the rich man, like one in the jaws of death.

'श्रिया ह्यभीक्ष्णं संवासो मोहयत्यविचक्षणम् ।
अथैनं रूपमानश्च धनमानश्च विन्दति ॥

"A constant association with riches confounds the undiscerning person. Pride of his own beauty and wealth come to him then.

'नात्यक्त्वा सुखमाप्नोति नात्यक्त्वा विन्दते परम् ।
नात्यक्त्वा चाभयश्शेते त्यक्त्वा सर्वं सुखी भवेत् ॥

"Not without giving up does one attain happiness; not without giving up does one attain the Supreme; not without giving up does one rest without any fear; giving up everything, one becomes happy.

'सर्वसाम्यमनायासस्सत्यवाक्यं च [भारत] ।
निर्वेदश्चाविधित्सा च यस्य स्यात्स सुखी नरः॥

"That man is happy who has universal equanimity, who does not worry himself, who speaks the truth, who has disgust (for mundane things) and no desire to do this and that.

'प्रापणात्सर्वकामानां परित्यागो विशिष्यते ।
नान्तं सर्वविधित्सानां गतपूर्वोऽस्ति कश्चन ।
निवर्तस्व विधित्साभ्यः शाम्य निर्विद्य कामुक॥

"Giving up all desires is better than realising them. Nobody has, till now, finished with all his desires to do things. Turn away from desires to do things and you, creature of desire! with disgust (for things), quiet yourself.

'प्रज्ञा प्रतिष्ठा भूतानां प्रज्ञा लाभः परो मतः ।
प्रज्ञा निःश्रेयसी लोके प्रज्ञा स्वर्गो मतस्सताम् ॥

"Knowledge is the support of beings; knowledge is considered the greatest acquisition; knowledge is the greatest happiness in the world; knowledge is considered by the good as heaven.

'न तृप्तिः प्रियलाभेऽस्ति तृष्णा नाद्भिः प्रशाम्यति।
संप्रज्वलति सा भूयः समिद्भिरिव पावकः ॥

"There is no contentment when the dear object is attained; (the fire of) greed is not extinguished by the waters (of objects realised); as fire by fuel, it only blazes forth more.

'पुलाका इव धान्येषु पुत्तिका इव पक्षिषु ।
तद्विधास्ते मनुष्येषु येषां धर्मो न कारणम् ॥

"Like chaff among the grains and gnats among the birds are those among men, with whom Dharma is not the motive force.

'सत्यं ब्रह्म तपस्सत्यं स्वर्गं सत्येन गच्छति ।
अनृतं तमसो रूपं तमसा नीयते ह्यधः ।
स्वर्गः प्रकाश इत्याहुर्नरकं तम एव च ॥

"Truth is the Godhead, truth is penance; one goes to heaven by truth. Falsehood is of the form of darkness; by darkness, one is taken down. Heaven, they say, is light, and hell, darkness.

'वत्सलास्सर्वभूतानां वाच्याः श्रोत्रसुखा गिरः।
परिवादापवादौ च पारुष्यं चात्र गर्हितम्।
अवज्ञानमहङ्कारो दम्भश्चैव विगर्हितः॥

"Affectionate words pleasing to the ears of all beings must be spoken; reviling, scandal and violence in language are forbidden; insulting others, egotism and hypocrisy are condemned.

'सन्तापाद् भ्रश्यते रूपं सन्तापाद्भ्रश्यते श्रियः।
सन्तापाद् भ्रश्यते चायुर्धर्मश्चैव न संशयः॥
विशोकता सुखं धत्ते धत्ते चारोग्यमुत्तमम्॥

"One's beauty is lost by (the effects of) annoying oneself; such a one falls from prosperity; his life dwindles and surely his Dharma also declines. Being without sorrow bestows happiness and excellent health.

'नारुन्तुदस्स्यान्न नृशंसवादी
न हीनतः परमभ्याददीत।
ययाऽस्य वाचा पर उद्विजेत
न तां वदेदुशतीं पापलोक्याम्॥

"One should not hit a man at his weak points; should not speak wickedly; should not receive big things from inferior persons; should not speak that cutting word which leads one to the world of sin, the word at which another would shudder.

'वेदस्योपनिषत्सत्यं सत्यस्योपनिषद्दमः ।
दमस्योपनिषन्मोक्ष एतत्सर्वानुशासनम् ॥

"The secret meaning of the Vedas is truth; of truth, self-control; of self-control, release from bondage; this is the all-comprehensive gospel.

'शिश्नोदरे ये निरतास्सदैव
स्तेना नरा वाक्परुषाश्च नित्यम् ।
अपेतधर्मानिति तान्विदित्वा
दूराद्देवास्संपरिवर्जयन्ति ॥'

"Those who are always taking pleasure in sex and eating, those who steal others' possessions, and those men who are always violent in tongue—considering these as bereft of Dharma, the gods avoid them from a distance."

॥ इति शान्तिपर्व समाप्तम् ॥

THUS ENDS THE SANTI PARVA.

॥ अथ अनुशासनपर्व ॥

ANUSASANA PARVA

भीष्मः—

'आचाराल्लभते ह्यायुर्दुराचारा गतायुषः ॥

Bhishma continued—

"One obtains a long life by good conduct; those of bad conduct die early.

'परदारा न गन्तव्याः परिवादं विवर्जयेत् ।
द्वेषस्तंभाभिमानं च तैक्ष्ण्यं च परिवर्जयेत् ॥

"One must not seek others' wives, must avoid talking ill of others, avoid hate, stiffness, pride and severity.

'वृद्धो ज्ञातिस्तथा मित्रं दरिद्रं या भवेदपि।
कुलीनः पण्डित इति रक्ष्या निस्स्वास्स्वशक्तितः॥

"An old man, a relative, a friend, a widowed sister, a teacher, one of a good family and a learned man,—these, if poor, must be protected by one according to one's ability.

'अनायुष्या भवेदीर्ष्या तस्मादीर्ष्यां विवर्जयेत् ॥

"Jealousy is not conducive to longevity; therefore one should avoid jealousy.

'अगाधे विमले शुद्धे सत्यतीर्थे धृतिह्रदे ।
स्नातव्यं मानसे तीर्थे सत्त्वमालम्ब्य शाश्वतम् ॥

"One must bathe in the sacred waters, deep, clear and pure, of his own mind, in the lake of firmness and at the ford of Truth.

'तीर्थशौचं तपो ज्ञानं मार्दवं सत्यमार्जवम् ।
अहिंसा सर्वभूतानामानृशंस्यं दमश्शमः ॥

"Penance, Knowledge, Softness, Truthfulness, Straightforwardness, Non-injury to all beings, Sympathy, Self-control, Tranquillity,—these constitute purity by bath in waters.

'वृत्तशौचं महाशौचं तीर्थशौचमतः परम् ॥

"Purity of conduct is the great purity; the purity by baths in sacred waters is only next to that.

'धन्यं यशस्यमायुष्यं स्वर्ग्यं स्वस्त्ययनं महत् ।
मांसस्याभक्षणं प्राहुर्नियताः परमर्षयः ॥

"The great abstemious sages say that the avoiding of the eating of flesh is blessed, praiseworthy, conducive to long life, helpful to attain heaven and is the great way to well-being.

'कामक्रोधाद्भयाद्वाऽपि यदि चेत्सन्त्यजेत्तनुम् ।
सोऽनन्तं नरकं याति आत्महन्तृत्वकारणात् ॥

"He who commits suicide in passion, anger or fear, goes to eternal hell because of his suicide.

'शोकस्थानसहस्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥

"Every day, thousands of occasions for sorrow, and hundreds of circumstances producing fear take possession of a fool, but not a wise man.

'सुखमेकान्ततो नास्ति शक्रस्यापि त्रिविष्टपे ॥

"There is no absolute and invariable happiness even for Indra in his heaven.

'क्षयान्ता निचयास्सर्वे पतनान्तास्समुच्छ्रयाः ।
संयोगा विप्रयोगान्ता मरणान्तं च जीवितम् ॥

"All accumulations end in loss; all rises end in fall; all unions end in separation; and life ends in death.

'अर्थानामार्जने दुःखमार्जितानां तु रक्षणे ।
नाशे दुःखं व्यये दुःखं धिगर्थं दुःखभाजनम् ॥

"There is trouble in earning riches; trouble in guarding the riches earned; trouble if they are lost, trouble if they are spent; fie on wealth, the store-house of miseries.

'जायमानांश्च संप्रेक्ष्य म्रियमाणांस्तथैव च ।
न संवेगोऽस्ति चेत्पुंसः काष्ठलोष्टसमो हि सः ॥

"Seeing so well those who are being born and those who are, in the same manner, dying, if a man is not violently disturbed, he is verily equal to a piece of wood or a lump of clay.

'उपायोयं परप्राप्तौ परमः परिकीर्तितः ।
नारायणस्यानुध्यानमर्चनं यजनं स्तुतिः ॥

"This has been described as the best means of attaining the *summum bonum*,—the continuous meditation of Lord Narayana, worshipping Him, making offerings to Him and singing His praises.

'जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण सर्वदुःखातिगो भवेत् ॥

"Singing the praise of the Lord of the universe, the God of gods, the Infinite and Supreme Being with His thousand names, one surmounts all misery.

'एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।
यद् भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरस्सदा ॥

"This Dharma I consider the greatest of all Dharmas, namely, that man should always worship with devotion and hymns the Lotus-eyed Lord, Narayana.

'न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ॥

"In the blessed who are the devotees of Lord Narayana, there is no anger, no malice, no avarice, no evil thought.

'एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः ।
त्रींल्लोकान्व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः॥

"The one Vishnu, the Great Being, the Soul of all beings, the Enjoyer of the universe, the Imperishable Lord, pervades and enjoys the various separate beings and (all) the three worlds.

'नमोऽस्त्वनन्ताय सहस्रमूर्तये
सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते
सहस्रकोटीयुगधारिणे नमः ॥

"Obeisance unto that Imperishable Being, of thousand forms, of thousand feet, eyes, heads and hands; obeisance unto that Eternal Being of thousand names, who has in Himself thousands of crores of aeons of Time.

'पालय त्वं प्रजास्सर्वाः कृष्णस्तेऽस्तु परायणम्।"
इत्युक्त्वोपासनार्थाय विरराम महामतिः ॥

"(Yudhisthira,) protect all your subjects; let Krishna be your greatest refuge;" having said thus, the wise Bhishma, stopped for meditating (upon the Lord).

तूष्णींभूते ततस्तस्मिन् व्यास आह वचस्त्वरन्।
'राजन्प्रकृतिमापन्नः कुरुराजो युधिष्ठिरः।
तमिमं पुरयानाय समनुज्ञातुमर्हसि ॥'

When Bhishma had become silent Vyasa hastened and said: "King (Bhishma)! Yudhisthira, the Kuru king, is composed (by this discourse of yours); you must give him leave to go to his city."

युधिष्ठिरं सहामात्यमनुजज्ञे नदीसुतः।
उवाच चैनं मधुरं नृपं शान्तनवो नृपः ॥

King Bhishma, son of the Ganges and Santanu, gave leave to Yudhisthira and his ministers and spoke to him sweetly:

'प्रविश स्वपुरीं राजन् धर्मे च ध्रियतां मनः।
श्रेयसा योक्ष्यसे चैव व्येतु ते मानसो ज्वरः।
आगन्तव्यं च भवता प्रवृत्ते चोत्तरायणे॥'

"King, go to your City; let your mind be set on Dharma; son of Pritha (Kunti)! You will attain good fortune; let your mind's fever disappear; you must come (here again to me) when the sun has begun to go northwards from the South."

तथेत्युक्त्वा च कौन्तेयः प्रययौ नागसाह्वयम्।
उषित्वा शर्वरीः श्रीमान् पञ्चाशन्नगरोत्तमे।
दृष्ट्वा निवृत्तमादित्यं परिबर्हेण संवृतः।
आससाद कुरुक्षेत्रे ततश्शान्तनवं नृपः॥

Saying that he would do so, Yudhisthira went to Hastinapura. After living in his excellent city for fifty nights, and seeing then that the sun had returned (from the South), king Yudhisthira, surrounded by his retinue, came to Bhishma in Kurukshetra.

"Obeisance unto that Imperishable Being, of thousand forms, of thousand feet, eyes, heads and hands; obeisance unto that Eternal Being of thousand names, who has in Himself thousands of crores of aeons of Time.

'पालय त्वं प्रजास्सर्वाः कृष्णस्तेऽस्तु परायणम्।"
इत्युक्त्वोपासनार्थाय विरराम महामतिः ॥

"(Yudhisthira,) protect all your subjects; let Krishna be your greatest refuge;" having said thus, the wise Bhishma, stopped for meditating (upon the Lord).

तूष्णींभूते ततस्तस्मिन् व्यास आह वचस्त्वरन्।
'राजन्प्रकृतिमापन्नः कुरुराजो युधिष्ठिरः।
तमिमं पुरयानाय समनुज्ञातुमर्हसि ॥'

When Bhishma had become silent Vyasa hastened and said: "King (Bhishma)! Yudhisthira, the Kuru king, is composed (by this discourse of yours); you must give him leave to go to his city."

युधिष्ठिरं सहामात्यमनुजज्ञे नदीसुतः।
उवाच चैनं मधुरं नृपं शान्तनवो नृपः ॥

